# sUtagItA

# સૂતગીતા

## Document Information

Text title : sUtagItA

File name : sUtagItA.itx

Category : gItA, giitaa, vIrashaiva

Location : doc_giitaa

Transliterated by : Sunder Hattangadi sunder at hotmail.com

Proofread by : Sunder Hattangadi sunder at hotmail.com

Description-comments : From Skanda Purana, Yajnavaibhava Khanda

Latest update : Feb. 28, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# sUtagItA

# સૂતગીતા

શ્રીમત્સૂતસંહિતાયાં । ચતુર્થસ્ય યજ્ઞવૈભવખણ્ડસ્યોપરિભાગે
સૂતગીતાપ્રારમ્ભઃ ।

પ્રથમોઽધ્યાયઃ । ૧. સૂતગીતિઃ । ૧-૨૮
દ્વિતીયોઽધ્યાયઃ । ૨. આત્મના સૃષ્ટિકથનમ્ । ૧-૮૦
તૃતીયોઽધ્યાયઃ । ૩. સામાન્યસૃષ્ટિકથનમ્ । ૧-૬૫
ચતુર્થોઽધ્યાયઃ । ૪. વિશેષસૃષ્ટિકથનમ્ । ૧-૪૯
પઞ્ચમોઽધ્યાયઃ । ૫. આત્મસ્વરૂપકથનમ્ । ૧-૭૪
ષષ્ઠોઽધ્યાયઃ । ૬. સર્વશાસ્ત્રાર્થસઙ્ગ્રહવર્ણનમ્ । ૧-૩૭
સપ્તમોઽધ્યાયઃ । ૭. રહસ્યવિચારઃ । ૧-૩૪
અષ્ટમોઽધ્યાયઃ । ૮. સર્વવેદાન્તસઙ્ગ્રહઃ ॥ ૧-૯૧
Total chapters 8 versess 458

અથ પ્રથમોઽધ્યાયઃ ।

૧. સૂતગીતિઃ ।

ઐશ્વરં પરમાનન્દમનન્તં સત્યચિદ્ઘનમ્ ।
આત્મત્વેનૈવ પશ્યન્તં નિસ્તરઙ્ગસમુદ્રવત્ ॥ ૧॥

નિર્વિકલ્પં સુસમ્પૂર્ણં સુપ્રસન્નં શુચિસ્મિતમ્ ।
ભાસયન્તં જગદ્ભાસા ભાનુમન્તમિવાપરમ્ ॥ ૨॥

પ્રણમ્ય મુનયઃ સૂતં દણ્ડવત્પૃથિવીતલે ।
કૃતઞ્જલિપુટા ભૂત્વા તુષ્ટુવુઃ પરયા મુદા ॥ ૩॥

નમસ્તે ભગવન્ શમ્ભુપ્રસાદાવાપ્તવેદન ।
નમસ્તે ભગવન્ શમ્ભુચરણામ્ભોજવલ્લભ ॥ ૪॥

નમસ્તે શમ્ભુભક્તાનામગ્રગણ્ય સમાહિત ।
નમસ્તે શમ્ભુભક્તાનામતીવ હિતબોધક ॥ ૫॥

નમસ્તે વેદવેદાન્તપદ્મખણ્ડદિવાકર ।
વ્યાસવિજ્ઞાનદીપસ્ય વર્તિભૂતાય તે નમઃ ॥ ૬॥

પુરાણમુક્તામાલાયાઃ સૂત્રભૂતાય તે નમઃ ।
અસ્માકં ભવવૃક્ષસ્ય કુઠારાય નમોઽસ્તુ તે ॥ ૭॥

કૃપાસાગર સર્વેષાં હિતપ્રદ નમોઽસ્તુ તે ।
નમોઽવિજ્ઞાતદોષાય નમો જ્ઞાનગુણાય તે ॥ ૮॥

માતૃભૂતાય મર્ત્યાનાં વ્યાસશિષ્યાય તે નમઃ ।
ધર્મિષ્ઠાય નમસ્તુભ્યં બ્રહ્મનિષ્ઠાય તે નમઃ ॥ ૯॥

સમાય સર્વજન્તૂનાં સારભૂતાય તે નમઃ ।
સાક્ષાત્સત્યપરાણાં તુ સત્યભૂતાય તે નમઃ ॥ ૧૦॥

નમો નમો નમસ્તુભ્યં પુનર્ભૂયો નમો નમઃ ।
અસ્માકં ગુરવે સાક્ષાન્નમઃ સ્વાત્મપ્રદાયિને ॥ ૧૧॥

એવં ગોત્રર્ષયઃ સ્તુત્વા સૂતં સર્વહિતપ્રદમ્ ।
પ્રશ્નં પ્રચક્રિરે સર્વે સર્વલોકહિતૈષિણઃ ॥ ૧૨॥

સોઽપિ સૂતઃ સ્વતઃ સિદ્ધઃ સ્વરૂપાનુભવાત્પરાત્ ।
ઉત્થાય સ્વગુરું વ્યાસં દધ્યૌ સર્વહિતે રતમ્ ॥ ૧૩॥

અસ્મિન્નવસરે વ્યાસઃ સાક્ષાત્સત્યવતીસુતઃ ।
ભસ્મોદ્ધૂલિતસર્વાઙ્ગસ્ત્રિપુણ્ડ્રાઙ્કિતમસ્તકઃ ॥ ૧૪॥

કૃષ્ણાજિની સોત્તરીય આષાઢેન વિરાજિતઃ ।
રુદ્રાક્ષમાલાભરણસ્તત્રૈવાવિરભૂત્સ્વયમ્ ॥ ૧૫॥

તં દૃષ્ટ્વા દેશિકેન્દ્રાણાં દેશિકં કરુણાકરમ્ ।
સૂતઃ સત્યવતીસૂનું સ્વશિષ્યૈઃ સહ સત્તમૈઃ ॥ ૧૬॥

પ્રણમ્ય દણ્ડવદ્ભૂમૌ પ્રસન્નેન્દ્રિયમાનસઃ ।
યથાર્હં પૂજયામાસ દત્ત્વા ચાઽઽસનમુત્તમમ્ ॥ ૧૭॥

ભદ્રમસ્તુ સુસમ્પૂર્ણં સૂત શિષ્ય મમાઽઽસ્તિક ।
તવૈષામપિ કિં કાર્યં મયા તદ્બ્રૂહિ મેઽનઘ ॥ ૧૯॥

એવં વ્યાસવચઃ શ્રુત્વા સૂતઃ પૌરાણિકોત્તમઃ ।

ઉવાચ મધુરં વાક્યં લોકાનાં હિતમુત્તમમ્ ॥ ૨૦॥

સૂત ઉવાચ -
ઇમે હિ મુનયઃ શુદ્ધાઃ સત્યધર્મપરાયણાઃ ।
મદ્ગીતાશ્રવણે ચૈષામસ્તિ શ્રદ્ધા મહત્તરા ॥ ૨૧॥

ભવત્પ્રસાદે સત્યેવ શક્યતે સા વિભાષિતુમ્ ।
યદિ પ્રસન્નો ભગવન્ વદેત્યાજ્ઞાપયાદ્ય મામ્ ॥ ૨૨॥

ઇતિ સૂતવચઃ શ્રુત્વા ભગવાન્ કરુણાનિધિઃ ।
ત્વદીયામદ્ય તાં ગીતાં વદૈષામર્થિનાં શુભામ્ ॥ ૨૩॥

ઇત્યુક્ત્વા શિષ્યમાલિઙ્ગ્ય હૃદયં તસ્ય સંસ્પૃશન્ ।
સામ્બં સર્વેશ્વરં ધ્યાત્વા નિરીક્ષ્યૈનં કૃપાબલાત્ ॥ ૨૪॥

સ્થાપયિત્વા મહાદેવં હૃદયે તસ્ય સુસ્થિરમ્ ।
તસ્ય મૂર્ધાનમાઘ્રાય ભગવાનગમદ્ગુરુઃ ॥ ૨૫॥

સોઽપિ સૂતઃ પુનઃ સામ્બં ધ્યાત્વા દેવં ત્ર્યમ્બકમ્ ।
પ્રણમ્ય દણ્ડવદ્ભૂમૌ સ્મૃત્વા વ્યાસં ચ સદ્ગુરુમ્ ॥ ૨૬॥

કૃતાઞ્જલિપુટો ભૂત્વા મન્ત્રમાદ્યં ષડક્ષરમ્ ।
જપિત્વા શ્રદ્ધયા સાર્ધં નિરીક્ષ્ય મુનિપુઙ્ગવન્ ॥ ૨૭॥

કૃતપ્રણામો મુનિભિઃ સ્વગીતામતિનિર્મલામ્ ।
વક્તુમારભતે સૂત સર્વલોકહિતે રતઃ ॥ ૨૮॥

॥ ઇતિ શ્રીસૂતસંહિતાયાં યજ્ઞવૈભવખણ્ડસ્યોપરિભાગે
સૂતગીતાયાં સૂતગીતિર્નામ પ્રથમોઽધ્યાયઃ ॥ ૧ ॥

---

અથ દ્વિતીયોઽધ્યાયઃ ॥

૨. આત્મના સૃષ્ટિકથનમ્ ।

સૂત ઉવાચ -
શ્રુણુત બ્રહ્મવિચ્છ્રેષ્ઠા ભાગ્યવન્તઃ સમાહિતાઃ ।
વક્ષ્યામિ પરમં ગુહ્યં વિજ્ઞાનં વેદસંમતમ્ ॥ ૧॥

અસ્તિ કશ્ચિત્સ્વત સિદ્ધઃ સત્યજ્ઞાનસુખાદ્વયઃ ।
વિશ્વસ્ય જગતઃ કર્તા પશુપાશવિલક્ષણઃ ॥ ૨॥

આકાશાદીનિ ભૂતાનિ પઞ્ચ તેષાં પ્રકીર્તિતાઃ ।
ગુણાઃ શબ્દાદયઃ પઞ્ચ પઞ્ચ કર્મેન્દ્રિયાણિ ચ ॥ ૩॥

જ્ઞાનેન્દ્રિયાણિ પઞ્ચૈવ પ્રાણાદ્યા દશ વાયવઃ ।
મનો બુદ્ધિરહઙ્કારશ્ચિત્તં ચેતિ ચતુષ્ટયમ્ ॥ ૪॥

તેષાં કારણભૂતૈકાઽવિદ્યા ષટ્ત્રિંશકઃ પશુઃ ।
વિશ્વસ્ય જગતઃ કર્તા પશોરન્યઃ પરઃ શિવઃ ॥ ૫॥

આત્માનઃ પશવઃ સર્વે પ્રોક્તા અજ્ઞાનિનઃ સદા ।
અજ્ઞાનમાત્મનામેષામનાદ્યેવ સ્વભાવતઃ ॥ ૬॥

સંસારબીજમજ્ઞાનં સંસાર્યજ્ઞઃ પુમાન્યતઃ ।
જ્ઞાનાત્તસ્ય નિવૃત્તિઃ સ્યાત્પ્રકાશાત્તમસો યથા ॥ ૭॥

અજ્ઞાનાકારભેદેનાવિદ્યાખ્યેનૈવ કેવલમ્ ।
પશૂનામાત્મનાં ભેદઃ કલ્પિતો ન સ્વભાવતઃ ॥ ૮॥

અજ્ઞાનાકારભેદેન માયાખ્યેનૈવ કેવલમ્ ।
વિભાગઃ કલ્પિતો વિપ્રાઃ પરમાતત્વલક્ષણઃ ॥ ૯॥

ઘટાકાશમહાકાશવિભાગઃ કલ્પિતો યથા ।
તથૈવ કલ્પિતો ભેદો જીવાત્મપરમાત્મનોઃ ॥ ૧૦॥

યથા જીવબહુત્વં તુ કલ્પિતં મુનિપુઙ્ગવાઃ ।
તથા પરબહુત્વં ચ કલ્પિતં ન સ્વભાવતઃ ॥ ૧૦॥

યથોચ્ચાવચભાવસ્તુ જીવભેદે તુ કલ્પિતઃ ।
તથોચ્ચાવચભાવશ્ચ પરભેદે ચ કલ્પિતઃ ॥ ૧૨॥

દેહેન્દ્રિયાદિસઙ્ઘાતવાસનાભેદભેદિતા ।
અવિદ્યા જીવભેદસ્ય હેતુર્નાન્યઃ પ્રકીર્તિતઃ ॥ ૧૩॥

ગુણાનાં વાસનાભેદભેદિતા યા દ્વિજર્ષભાઃ ।
માયા સા પરભેદસ્ય હેતુર્નાન્યઃ પ્રકીર્તિતઃ ॥ ૧૪॥

યસ્ય માયાગતં સત્ત્વં શરીરં સ્યાત્તમોગુણઃ ।
સંહારાય ત્રિમૂર્તીનાં સ રુદ્રઃ સ્યાન્ન ચાપરઃ ॥ ૧૫॥

તથા યસ્ય તમઃ સાક્ષાચ્છરીરં સાત્ત્વિકો ગુણઃ ।
પાલનાય ત્રિમૂર્તીનાં સ વિષ્ણુઃ સ્યાન્ન ચાપરઃ ॥ ૧૬॥

રજો યસ્ય શરીરં સ્યાત્તદેવોત્પાદનાય ચ ।
ત્રિમૂર્તીનાં સ વૈ બ્રહ્મા ભવેદ્વિપ્રા ન ચાપરઃ ॥ ૧૭ ॥

રુદ્રસ્ય વિગ્રહં શુક્લં કૃષ્ણં વિષ્ણોશ્ચ વિગ્રહમ્ ।
બ્રહ્મણો વિગ્રહં રક્તં ચિન્તયેદ્ભુક્તિમુક્તયે ॥ ૧૮ ॥

શૌક્લ્યં સત્ત્વગુણાજ્જાતં રાગો જાતો રજોગુણાત્ ।
કાર્ષ્ણ્યં તમોગુણાજ્જાતમિતિ વિદ્યાત્સમાસતઃ ॥ ૧૯ ॥

પરતત્ત્વૈકતાબુદ્ધ્યા બ્રહ્માણં વિષ્ણુમીશ્વરમ્ ।
પરતત્ત્વતયા વેદા વદન્તિ સ્મૃતયોઽપિ ચ ॥ ૨૦ ॥

પુરાણાનિ સમસ્તાનિ ભારતપ્રમુખાન્યપિ ।
પરતત્ત્વૈકતાબુદ્ધ્યા તાત્પર્યં પ્રવદન્તિ ચ ॥ ૨૧ ॥

બ્રહ્મવિષ્ણ્વાદિરૂપેણ કેવલં મુનિપુઙ્ગવાઃ ।
બ્રહ્મવિષ્ણ્વાદયસ્ત્વેવ ન પરં તત્ત્વમાસ્તિકાઃ ॥ ૨૨ ॥

તથાઽપિ રુદ્રઃ સર્વેષામુત્કૃષ્ટઃ પરિકીર્તિતઃ ।
સ્વશરીરતયા યસ્માન્મનુતે સત્ત્વમુત્તમમ્ ॥ ૨૩ ॥

રજસસ્તમસઃ સત્ત્વમુત્કૃષ્ટં હિ દ્વિજોત્તમાઃ ।
સત્ત્વાત્સુખં ચ જ્ઞાનં ચ યત્કિઞ્ચિદપરં પરમ્ ॥ ૨૪ ॥

પરતત્ત્વપ્રકાશસ્તુ રુદ્રસ્યૈવ મહત્તરઃ ।
બ્રહ્મવિષ્ણ્વાદિદેવાનાં ન તથા મુનિપુઙ્ગવાઃ ॥ ૨૫ ॥

પરતત્ત્વતયા રુદ્રઃ સ્વાત્માનં મનુતે ભૃશમ્ ।
પરતત્ત્વપ્રકાશેન ન તથા દેવતાન્તરમ્ ॥ ૨૬ ॥

હરિબ્રહ્માદિરૂપેણ સ્વાત્માનં મનુતે ભૃશમ્ ।
હરિબ્રહ્માદયો દેવા ન તથા રુદ્રમાસ્તિકાઃ ॥ ૨૭ ॥

રુદ્રઃ કથંચિત્કાર્યાર્થં મનુતે રુદ્રરૂપતઃ ।
ન તથા દેવતાઃ સર્વા બ્રહ્મસ્ફૂર્ત્યલ્પતાબલાત્ ॥ ૨૮ ॥

બ્રહ્મવિષ્ણ્વાદયો દેવાઃ સ્વાત્માનં મન્વતેઽઞ્જસા ।
ન કશ્ચિત્તત્ત્વરૂપેણ ન તથા રુદ્ર આસ્તિકાઃ ॥ ૨૯ ॥

બ્રહ્મવિષ્ણ્વાદયો દેવાઃ સ્વાત્માનં મન્વતેઽઞ્જસા ।

કથંચિત્તત્ત્વરૂપેણ ન તથા રુદ્ર આસ્તિકાઃ ॥ ૩૦॥

તત્ત્વબુદ્ધિઃ સ્વતઃસિદ્ધા રુદ્રસ્યાસ્ય તપોધનાઃ ।
હરિબ્રહ્માદિબુદ્ધિસ્તુ તેષાં સ્વાભાવિકી મતા ॥ ૩૧॥

હરિબ્રહ્માદિદેવાન્યે પૂજયન્તિ યથાબલમ્ ।
અચિરાન્ન પરપ્રાપ્તિસ્તેષામસ્તિ ક્રમેણ હિ ॥ ૩૨॥

રુદ્રં યે વેદવિચ્છ્રેષ્ઠાઃ પૂજયન્તિ યથાબલમ્ ।
તેષામસ્તિ પરપ્રાપ્તિરચિરાન્ન ક્રમેણ તુ ॥ ૩૩॥

રુદ્રાકારતયા રુદ્રો વરિષ્ઠો દેવતાન્તરાત્ ।
ઇતિ નિશ્ચયબુદ્ધિસ્તુ નરાણાં મુક્તિદાયિની ॥ ૩૪॥

ગુણાભિમાનિનો રુદ્રાદ્ધરિબ્રહ્માદિદેવતાઃ ।
વરિષ્ઠા ઇતિ બુદ્ધિસ્તુ સત્યં સંસારકારણમ્ ॥ ૩૫॥

પરતત્ત્વાદપિ શ્રેષ્ઠો રુદ્રો વિષ્ણુઃ પિતામહઃ ।
ઇતિ નિશ્ચયબુદ્ધિસ્તુ સત્યં સંસારકારણમ્ ॥ ૩૬॥

રુદ્રો વિષ્ણુઃ પ્રજાનાથઃ સ્વરાટ્સમ્રાટ્પુરન્દરઃ ।
પરતત્ત્વમિતિ જ્ઞાનં નરાણાં મુક્તિકારણમ્ ॥ ૩૭॥

અમાત્યે રાજબુદ્ધિસ્તુ ન દોષાય ફલાય હિ ।
તસ્માદ્બ્રહ્મમતિર્મુખ્યા સર્વત્ર ન હિ સંશયઃ ॥ ૩૮॥

તથાઽપિ રુદ્રે વિપ્રેન્દ્રાઃ પરતત્ત્વમતિર્ભૃશમ્ ।
વરિષ્ઠા ન તથાઽન્યેષુ પરસ્ફૂર્ત્યલ્પતાબલાત્ ॥ ૩૯॥

અસ્તિ રુદ્રસ્ય વિપ્રેન્દ્રા અન્તઃ સત્ત્વં બહિસ્તમઃ ।
વિષ્ણોરન્તસ્તમઃ સત્ત્વં બહિરસ્તિ રજોગુણઃ ॥ ૪૦॥

અન્તર્બહિશ્ચ વિપ્રેન્દ્રા અસ્તિ તસ્ય પ્રજાપતેઃ ।
અતોઽપેક્ષ્ય ગુણં સત્ત્વં મનુષ્યા વિવદન્તિ ચ ॥ ૪૧॥

હરિઃ શ્રેષ્ઠો હરઃ શ્રેષ્ઠ ઇત્યહો મોહવૈભવમ્ ।
સત્ત્વાભાવાત્પ્રજાનાથં વરિષ્ઠં નૈવ મન્વતે ॥ ૪૨॥

અનેકજન્મસિદ્ધાનાં શ્રૌતસ્માર્તાનુવર્તિનામ્ ।
હરઃ શ્રેષ્ઠો હરેઃ સાક્ષાદિતિ બુદ્ધિઃ પ્રજાયતે ॥ ૪૩॥

મહાપાપવતાં નૃણાં હરિઃ શ્રેષ્ઠો હરાદિતિ ।
બુદ્ધિર્વિજાયતે તેષાં સદા સંસાર એવ હિ ॥ ૪૪॥

નિર્વિકલ્પે પરે તત્ત્વે શ્રદ્ધા યેષાં વિજાયતે ।
અયત્નસિદ્ધા પરમા મુક્તિસ્તેષાં ન સંશયઃ ॥ ૪૫॥

નિર્વિકલ્પં પરં તત્ત્વં નામ સાક્ષાચ્છિવઃ પરઃ ।
સોઽયં સામ્બસ્ત્રિનેત્રશ્ચ ચન્દ્રાર્ધકૃતશેખરઃ ॥ ૪૬॥

સ્વાત્મતત્ત્વસુખસ્ફૂર્તિપ્રમોદાત્તાણ્ડવપ્રિયઃ ।
રુદ્રવિષ્ણુપ્રજાનાથૈરુપાસ્યો ગુણમૂર્તિભિઃ ॥ ૪૭॥

ઈદૃશી પરમા મૂર્તિર્યસ્યાસાધારણી સદા ।
તદ્ધિ સાક્ષાત્પરં તત્ત્વં નાન્યત્સત્યં મયોદિતમ્ ॥ ૪૮॥

વિષ્ણું બ્રહ્માણમન્યં વા સ્વમોહાન્મન્વતે પરમ્ ।
ન તેષાં મુક્તિરેષાઽસ્તિ તતસ્તે ન પરં પદમ્ ॥ ૪૯॥

તસ્માદેષા પરા મૂર્તિર્યસ્યાસાધારણી ભવેત્ ।
સ શિવઃ સચ્ચિદાનન્દઃ સાક્ષાત્તત્ત્વં ન ચાપરઃ ॥ ૫૦॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ વિભક્તા અપિ પણ્ડિતાઃ ।
પરમાત્મવિભાગસ્થા ન જીવવ્યૂહસંસ્થિતાઃ ॥ ૫૧॥

અવિદ્યોપાધિકો જીવો ન માયોપાધિકઃ ખલુ ।
માયોપાધિકચૈતન્યં પરમાત્મા હિ નાપરમ્ ॥ ૫૨॥

માયાકાર્યગુણચ્છન્ના બ્રહ્મવિષ્ણુમહેશ્વરાઃ ।
માયોપાધિપરવ્યૂહા ન જીવવ્યૂહસંસ્થિતાઃ ॥ ૫૩॥

પરમાત્મવિભાગત્વં બ્રહ્માદીનાં દ્વિજર્ષભાઃ ।
સમાનમપિ રુદ્રસ્તુ વરિષ્ઠો નાત્ર સંશયઃ ॥ ૫૪॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રસ્ય સ્વાસાધારણરૂપતઃ ।
સ્વવિભૂત્યાત્મના ચાપિ કુર્વાતે એવ સેવનમ્ ॥ ૫૫॥

રુદ્ર સ્વેનૈવ રૂપેણ વિષ્ણોશ્ચ બ્રહ્મણસ્તથા ।
સેવનં નૈવ કુરુતે વિભૂતેર્વા દ્વયોરપિ ॥ ૫૬॥

કેવલં કૃપયા રુદ્રો લોકાનાં હિતકામ્યયા ।
સ્વવિભૂત્યાત્મના વિષ્ણોર્બ્રહ્મણશ્ચાપરસ્ય ચ ॥ ૫૭॥

કરોતિ સેવાં હે વિપ્રાઃ કદાચિત્સત્યમીરિતમ્ ।
ન તથા બ્રહ્મણા વિષ્ણુર્ન બ્રહ્મા ન પુરન્દરઃ ॥ ૫૮॥

એતાવન્માત્રમાલમ્બ્ય રુદ્રં વિષ્ણું પ્રજાપતિમ્ ।
મન્વતે હિ સમં મર્ત્યા માયયા પરિમોહિતાઃ ॥ ૫૯॥

કેચિદેષાં મહાયાસાત્સામ્યં વાઞ્છન્તિ મોહિતાઃ ।
હરેરજસ્ય ચોત્કર્ષં હરાદ્વાઞ્છન્તિ કેચન ॥ ૬૦॥

રુદ્રેણ સામ્યમન્યેષાં વાઞ્છન્તિ ચ વિમોહિતાઃ ।
તે મહાપાતકૈર્યુક્તા યાસ્યન્તિ નરકાર્ણવમ્ ॥ ૬૧॥

રુદ્રાદુત્કર્ષમન્યેષાં યે વાઞ્છન્તિ મોહિતાઃ ।
પચ્યન્તે નરકે તીવ્રે સદા તે ન હિ સંશયઃ ॥ ૬૨॥

કેચિદદ્વૈતમાશ્રિત્ય બૈડાલવ્રતિકા નરાઃ ।
સામ્યં રુદ્રેણ સર્વેષાં પ્રવદન્તિ વિમોહિતાઃ ॥ ૬૩॥

દેહાકારેણ ચૈકત્વે સત્યપિ દ્વિજપુઙ્ગવાઃ ।
શિરસા પાદયોઃ સામ્યં સર્વથા નાસ્તિ હિ દ્વિજાઃ ॥ ૬૪॥

યથાઽઽસ્યાપાનયોઃ સામ્યં છિદ્રતોઽપિ ન વિદ્યતે ।
તથૈકત્વેઽપિ સર્વેષાં રુદ્રસામ્યં ન વિદ્યતે ॥ ૬૫॥

વિષ્ણુપ્રજાપતીન્દ્રાણામુત્કર્ષં શઙ્કરાદપિ ।
પ્રવદન્તીવ વાક્યાનિ શ્રૌતાનિ પ્રતિભાન્તિ ચ ॥ ૬૬॥

પૌરાણિકાનિ વાક્યાનિ સ્માર્તાનિ પ્રતિભાન્તિ ચ ।
તાનિ તત્ત્વાત્મના તેષામુત્કર્ષં પ્રવદન્તિ હિ ॥ ૬૭॥

વિષ્ણુપ્રજાપતીન્દ્રેભ્યો રુદ્રસ્યોત્કર્ષમાસ્તિકાઃ ।
વદન્તિ યાનિ વાક્યાનિ તાનિ સર્વાણિ હે દ્વિજાઃ ॥ ૬૮॥

પ્રવદન્તિ સ્વરૂપેણ તથા તત્ત્વાત્મનાઽપિ ચ ।
નૈવં વિષ્ણ્વાદિદેવાનામિતિ તત્ત્વવ્યવસ્થિતિઃ ॥ ૬૯॥

બહુનોક્તેન કિં જીવાસ્ત્રિમૂર્તીનાં વિભૂતયઃ ।
વરિષ્ઠા હિ વિભૂતિભ્યસ્તે વરિષ્ઠા ન સંશયઃ ॥ ૭૦॥

તેષુ રુદ્રો વરિષ્ઠશ્ચ તતો માયી પરઃ શિવઃ ।

માયાવિશિષ્ટાત્સર્વજ્ઞઃ સામ્બઃ સત્યાદિલક્ષણઃ ॥ ૭૧॥

વરિષ્ઠો મુનયઃ સાક્ષાચ્છિવો નાત્ર વિચારણા ।
શિવાદ્વરિષ્ઠો નૈવાસ્તિ મયા સત્યમુદીરિતમ્ ॥ ૭૨॥

શિવસ્વરૂપમાલોચ્ય પ્રવદામિ સમાસતઃ ।
શિવાદન્યતયા ભાતં શિવ એવ ન સંશયઃ ॥ ૭૩॥

શિવાદન્યતયા ભાતં શિવં યો વેદ વેદતઃ ।
સ વેદ પરમં તત્ત્વં નાસ્તિ સંશયકારણમ્ ॥ ૭૪॥

યઃ શિવઃ સકલં સાક્ષાદ્વેદ વેદાન્તવાક્યતઃ ।
સ મુક્તો નાત્ર સન્દેહઃ સત્યમેવ મયોદિતમ્ ॥ ૭૫॥

ભાસમાનમિદં સર્વં ભાનમેવેતિ વેદ યઃ ।
સ ભાનરૂપં દેવેશં યાતિ નાત્ર વિચારણા ॥ ૭૬॥

પ્રતીતમખિલં શમ્ભું તર્કતશ્ચ પ્રમાણતઃ ।
સ્વાનુભૂત્યા ચ યો વેદ સ એવ પરમાર્થવિત્ ॥ ૭૭॥

જગદ્રૂપતયા પશ્યન્નપિ નૈવ પ્રપશ્યતિ ।
પ્રતીતમખિલં બ્રહ્મ સમ્પશ્યન્ન હિ સંશયઃ ॥ ૭૮॥

પ્રતીતમપ્રતીતં ચ સદસચ્ચ પરઃ શિવઃ ।
ઇતિ વેદાન્તવાક્યાનાં નિષ્ઠાકાષ્ઠા સુદુર્લભા ॥ ૭૯॥

ઇતિ સકલં કૃપયા મયોદિતં વઃ
 શ્રુતિવચસ કથિતં યથા તથૈવ ।
યદિ હૃદયે નિહિતં સમસ્તમેત-
 ત્પરમગતિર્ભવતામિહૈવ સિદ્ધા ॥ ૮૦॥

॥ ઇતિ શ્રીસૂતસંહિતાયાં યજ્ઞવૈભવખણ્ડસ્યોપરિભાગે
સૂતગીતાયાં આત્મના સૃષ્ટિકથનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

---

અથ તૃતીયોઽધ્યાયઃ ।

૩. સામાન્યસૃષ્ટિકથનમ્ ।

સૂત ઉવાચ -
શિવાત્સત્યપરાનન્દપ્રકાશૈકસ્વલક્ષણાત્ ।

આવિર્ભૂતમિદં સર્વં ચેતનાચેતનાત્મકમ્ ॥ ૧॥

અદ્વિતીયોઽવિકારી ચ નિર્મલઃ સ શિવઃ પરઃ ।
તથાઽપિ સૃજતિ પ્રાજ્ઞાઃ સર્વમેતચ્ચરાચરમ્ ॥ ૨॥

મણિમન્ત્રૌષધાદીનાં સ્વભાવોઽપિ ન શક્યતે ।
કિમુ વક્તવ્યમાશ્ચર્યં વિભોરસ્ય પરાત્મનઃ ॥ ૩॥

શ્રુતિઃ સનાતની સાધ્વી સર્વમાનોત્તમોત્તમા ।
પ્રાહ ચાદ્વૈતનૈર્મલ્યં નિર્વિકારત્વમાત્મનઃ ॥ ૪॥

સર્ગસ્થિત્યન્તમપ્યાહ ચેતનાચેતનસ્ય ચ ।
અતીન્દ્રિયાર્થવિજ્ઞાને માનં નઃ શ્રુતિરેવ હિ ॥ ૫॥

શ્રુત્યૈકગમ્યે સૂક્ષ્માર્થે સ તર્કઃ કિં કરિષ્યતિ ।
માનાનુગ્રાહકસ્તર્કો ન સ્વતન્ત્રઃ કદાચન ॥ ૬॥

શ્રુતિઃ સનાતની શમ્ભોરભિવ્યક્તા ન સંશયઃ ।
શઙ્કરેણ પ્રણીતેતિ પ્રવદન્ત્યપરે જનાઃ ॥ ૭॥

યદા સાઽનાદિભૂતૈવ તદા માનમતીવ સા ।
સ્વતશ્ચ પરતો દોષો નાસ્તિ યસ્માદ્વિજર્ષભાઃ ॥ ૮॥

સ્વતો દોષો ન વેદસ્ય વિદ્યતે સૂક્ષ્મદર્શને ।
અસ્તિ ચેદ્વ્યવહારસ્ય લોપ એવ પ્રસજ્યતે ॥ ૯॥

પરતશ્ચ ન દોષોઽસ્તિ પરસ્યાભાવતો દ્વિજાઃ ।
સ્વતો દુષ્ટોઽપિ શબ્દસ્તુ માનમેવાઽઽપ્તસઙ્ગમાત્ ॥ ૧૦॥

ઇતિ વાર્તાઽપિ વાર્તૈવ મુનીન્દ્રાઃ સૂક્ષ્મદર્શને ।
સ્વતો દુષ્ટઃ કથં માનં ભવત્યન્યસ્ય સઙ્ગમાત્ ॥ ૧૧॥

યત્સમ્બન્ધેન યો ભાવો યસ્ય પ્રાજ્ઞાઃ પ્રસિદ્ધ્યતિ ।
સ તસ્ય ભ્રાન્તિરેવ સ્યાન્ન સ્વભાવઃ કથંચન ॥ ૧૨॥

જપાકુસુમલૌહિત્યં વિભાતિ સ્ફટિકે ભૃશમ્ ।
તથાઽપિ તસ્ય લૌહિત્યં ભ્રાન્તિરેવ ન વાસ્તવમ્ ॥ ૧૩॥

વહ્નિપાકજલૌહિત્યમિષ્ટકાયાં ન વાસ્તવમ્ ।
લૌહિત્યં તૈજસાંશસ્તુ નેષ્ટકાયા નિરૂપણે ॥ ૧૪॥

અન્યત્રાન્યસ્ય ધર્મસ્તુ પ્રતીતો વિભ્રમો મતઃ ।
આપ્તાપેક્ષી તુ શબ્દસ્તુ પ્રામાણ્યાય ન સર્વથા ॥ ૧૫॥

અનાપ્તયોગાચ્છબ્દસ્ય પ્રામાણ્યં મુનિપુઙ્ગવાઃ ।
સ્વતઃસિદ્ધં તિરોભૂતં સ્વનાશાય હિ કેવલમ્ ॥ ૧૬॥

યદા સા શઙ્કરેણોક્તા તદાઽપિ શ્રુતિરાસ્તિકાઃ ।
પ્રમાણં સુતરામાપ્તતમ એવ મહેશ્વરઃ ॥ ૧૭॥

સર્વદોષવિહીનસ્ય મહાકારુણિકસ્ય ચ ।
સર્વજ્ઞસ્યૈવ શુદ્ધસ્ય કથં દોષઃ પ્રકલ્પ્યતે ॥ ૧૮॥

સર્વદોષવિશિષ્ટસ્ય નિર્ઘૃણસ્ય દુરાત્મનઃ ।
અલ્પજ્ઞસ્ય ચ જીવસ્ય દૃષ્ટાઽનાપ્તિર્હિ સત્તમાઃ ॥ ૧૯॥

યસ્ય સ્મરણમાત્રેણ સમલો નિર્મલો ભવેત્ ।
બ્રૂત સત્યતપોનિષ્ઠાઃ કથં સ મલિનો ભવેત્ ॥ ૨૦॥

અતઃ પક્ષદ્વયેનાપિ વેદો માનં ન સંશયઃ ।
વેદોઽનાદિઃ શિવસ્તસ્ય વ્યઞ્જકઃ પરમાર્થતઃ ॥ ૨૧॥

અભિવ્યક્તિમપેક્ષ્યૈવ પ્રણેતેત્યુચ્યતે શિવઃ ।
તસ્માદ્વેદોપદિષ્ટાર્થો યથાર્થો નાત્ર સંશયઃ ॥ ૨૨॥

ઇહ તાવન્મયા પ્રોક્તમદ્વિતીયઃ પરઃ શિવઃ ।
તથાઽપિ તેન સકલં નિર્મિતં તત્સ એવ હિ ॥ ૨૩॥

ચિત્સ્વરૂપઃ શિવશ્ચેત્યં જગત્સર્વં ચરાચરમ્ ।
તથા સતિ વિરુદ્ધં તજ્જગચ્છમ્ભુઃ કથં ભવેત્ ॥ ૨૪॥

ઇત્યેવમાદિચોદ્યસ્ય દ્વિજેન્દ્રા નાસ્તિ સમ્ભવઃ ।
યત્ર વેદવિરોધઃ સ્યાત્તત્ર ચોદ્યસ્ય સમ્ભવઃ ॥ ૨૫॥

ચોદનાલક્ષણે ધર્મે ન યથા ચોદ્યસમ્ભવઃ ।
તથા ન ચોદનાગમ્યે શિવે ચોદ્યસ્ય સમ્ભવઃ ॥ ૨૬॥

બાધ્યબાધકભાવસ્તુ વ્યાધિભેષજયોર્યથા ।
શાસ્ત્રેણ ગમ્યતે તદ્વદયમર્થોઽપિ નાન્યતઃ ॥ ૨૭॥

ઈશ્વરસ્ય સ્વરૂપે ચ જગત્સર્ગાદિષુ દ્વિજાઃ ।
અતીન્દ્રિયાર્થેષ્વન્યેષુ માનં નઃ શ્રુતિરેવ હિ ॥ ૨૮॥

અથવા દેવદેવસ્ય સર્વદુર્ઘટકારિણી ।
શક્તિરસ્તિ તયા સર્વં ઘટતે માયયાઽનઘાઃ ॥ ૨૯॥

પ્રતીતિસિદ્ધા સા માયા તત્ત્વતોઽત્ર ન સંશયઃ ।
તયા દુર્ઘટકારિણ્યા સર્વં તસ્યોપપદ્યતે ॥ ૩૦॥

સા તિષ્ઠતુ મહામાયા સર્વદુર્ઘટકારિણી ।
વેદમાનેન સંસિદ્ધં સર્વં તદ્ગ્રાહ્યમેવ હિ ॥ ૩૧॥

ચોદ્યાનર્હે તુ વેદાર્થે ચોદ્યં કુર્વન્ પતત્યધઃ ।
અતઃ સર્વં પરિત્યજ્ય વેદમેકં સમાશ્રયેત્ ॥ ૩૨॥

રૂપાવલોકને ચક્ષુર્યથાઽસાધારણં ભવેત્ ।
તથા ધર્માદિવિજ્ઞાને વેદોઽસાધારણઃ પરઃ ॥ ૩૩॥

રૂપાવલોકનસ્યેદં યથા ઘ્રાણં ન કારણમ્ ।
તથા ધર્માદિબુદ્ધેસ્તુ દ્વિજાસ્તર્કો ન કારણમ્ ॥ ૩૪॥

તસ્માદ્વેદોદિતેનૈવ પ્રકારેણ મહેશ્વરઃ ।
અદ્વિતીયઃ સ્વયં શુદ્ધસ્તથાઽપીદં જગત્તતઃ ॥ ૩૫॥

આવિર્ભૂતં તિરોભૂતં સ એવ સકલં જગત્ ।
વૈભવં તસ્ય વિજ્ઞાતું ન શક્યં ભાષિતું મયા ॥ ૩૬॥

સ એવ સાહસી સાક્ષાત્સર્વરૂપતયા સ્થિતઃ ।
પરિજ્ઞાતું ચ વક્તું ચ સમર્થો નાપરઃ પુમાન્ ॥ ૩૭॥

યથાઽયઃ પાવકેનેદ્ધં ભાતીવ દહતીવ ચ ।
તથા વેદઃ શિવેનેદ્ધઃ સર્વં વક્તીવ ભાસતે ॥ ૩૮॥

અયોઽવયવસઙ્ક્રાન્તો યથા દહતિ પાવકઃ ।
તથા વેદેષુ સઙ્ક્રાન્તઃ શિવઃ સર્વાર્થસાધકઃ ॥ ૩૯॥

તથાઽપિ વેદરહિતઃ સ્વયં ધર્માદિવસ્તુનિ ।
ન પ્રમાણં વિના તેન વેદોઽપિ દ્વિજપુઙ્ગવાઃ ॥ ૪૦ ॥

તસ્માદ્વેદો મહેશેદ્ધઃ પ્રમાણં સર્વવસ્તુનિ ।
અન્યથા ન જડઃ શબ્દોઽતીન્દ્રિયાર્થસ્ય સાધકઃ ॥ ૪૧॥

મેરુપાર્શ્વે તપસ્તપ્ત્વા દૃષ્ટ્વા શમ્ભું જગદ્ગુરુમ્ ।

અયમર્થો મયા જ્ઞાતસ્તતસ્તસ્ય પ્રસાદતઃ ॥ ૪૨॥

તદાજ્ઞયૈવ વિપ્રેન્દ્રાઃ સંહિતેયં મયોદિતા ।
અહં ક્ષુદ્રોઽપિ યુષ્માકં મહતામપિ દેશિકઃ ॥ ૪૩॥

અભવં સા શિવસ્યાઽઽજ્ઞા લઙ્ઘનીયા ન કેનચિત્ ।
શિવસ્યાઽઽજ્ઞાબલાદ્વિષ્ણુર્જાયતે મ્રિયતેઽપિ ચ ॥ ૪૪॥

બ્રહ્મા સર્વજગત્કર્તા વિરાટ્સમ્રાટ્સ્વરાડપિ ।
ખરોષ્ટ્રતરવઃ ક્ષુદ્રા બ્રહ્મવિષ્ણ્વાદયોઽભવન્ ॥ ૪૫॥

તસ્માદ્ ગુરુત્વં મે વિપ્રા યુજ્યતે ન હિ સંશયઃ ।
શિષ્યત્વં ચાપિ યુષ્માકં સ્વતન્ત્રઃ ખલુ શઙ્કરઃ ॥ ૪૬॥

મહાદેવસ્ય ભક્તાશ્ચ તદ્ભક્તા અપિ દેહિનઃ ।
સ્વતન્ત્રા વેદવિચ્છ્રેષ્ઠાઃ કિં પુનઃ સ મહેશ્વરઃ ॥ ૪૭॥

સ્વાતન્ત્ર્યાદ્ધિ શિવેનૈવ વિષં ભુક્તં વિનાઽમૃતમ્ ।
બ્રહ્મણશ્ચ શિરશ્છિન્નં વિષ્ણોરપિ તથૈવ ચ ॥ ૪૮॥

સ્વાતન્ત્ર્યાદ્ધિ કૃતં તેન મુનીન્દ્રા બ્રહ્મવાદિનઃ ।
તત્પ્રસાદાન્મયા સર્વં વિદિતં કરબિલ્વવત્ ॥ ૪૯॥

પ્રસાદબલતઃ સાક્ષાત્સત્યાર્થઃ કથિતો મયા ।
પ્રસાદેન વિના વક્તું કો વા શક્તો મુનીશ્વરાઃ ॥ ૫૦॥

તસ્માત્સર્વં પરિત્યજ્ય શ્રદ્ધયા પરયા સહ ।
મદુક્તં પરમાદ્વૈતં વિદ્યાદ્વેદોદિતં બુધઃ ॥ ૫૧॥

વિજ્ઞાનેન વિનાઽન્યેન નાસ્તિ મુક્તિર્ન સંશયઃ ।
અતો યૂયમપિ પ્રાજ્ઞા ભવતાદ્વૈતવાદિનઃ ॥ ૫૨॥

પરમાદ્વૈતવિજ્ઞાનં સિદ્ધં સ્વાનુભવેન ચ ।
શ્રુતિસ્મૃતિપુરાણાદ્યૈસ્તર્કૈર્વેદાનુસારિભિઃ ॥ ૫૩॥

પરમાદ્વૈતવિજ્ઞાનમેવ ગ્રાહ્યં યથાસ્થિતમ્ ।
નાન્યતર્કૈશ્ચ હન્તવ્યમિદમામ્નાયવાક્યજમ્ ॥ ૫૪॥

વિનૈવ પરમાદ્વૈતં ભેદં કેચન મોહિતાઃ ।
કલ્પયન્તિ તદા શમ્ભુઃ સદ્વિતીયો ભવિષ્યતિ ॥ ૫૫॥

આમ્નાયાર્થં મહાદ્વૈતં નૈવ જાનન્તિ યે જનાઃ ।
વેદસિદ્ધં મહાદ્વૈતં કો વા વિજ્ઞાતુમર્હતિ ॥ ૫૬॥

ભિન્નાભિન્નતયા દેવં પરમાદ્વૈતલક્ષણમ્ ।
કલ્પયન્તિ મહામોહાત્કેચિત્તચ્ચ ન સઙ્ગતમ્ ॥ ૫૭॥

ભેદાભેદેઽપિ ભેદાંશો મિથ્યા ભવતિ સત્તમાઃ ।
ભેદાનિરૂપણાદેવ ધર્મ્યાદિરનિરૂપણાત્ ॥ ૫૮॥

તસ્માન્નાસ્તીશ્વરાદન્યત્કિઞ્ચિદપ્યાસ્તિકોત્તમાઃ ।
દ્વિતીયાદ્વૈ ભયં જન્તોર્ભવતીત્યાહ હિ શ્રુતિઃ ॥ ૫૯॥

કો મોહસ્તત્ર કઃ શોક એકત્વમનુપશ્યતઃ ।
ઇતિ ચાઽઽહ હિ સા સાધ્વી શ્રુતિરદ્વૈતમાસ્તિકાઃ ॥ ૬૦॥

એકત્વમેવ વાક્યાર્થો નાપરઃ પરમાસ્તિકાઃ ।
સ્તુતિનિન્દે વિરુધ્યેતે ભેદો યદિ વિવક્ષિતઃ ॥ ૬૧॥

અતીવ શુદ્ધચિત્તાનાં કેવલં કરુણાબલાત્ ।
પરમાદ્વૈતમામ્નાયાત્પ્રભાતિ શ્રદ્ધયા સહ ॥ ૬૨॥

શિવભટ્ટારકસ્યૈવ પ્રસાદે પુષ્કલે સતિ ।
પરમાદ્વૈતમાભાતિ યથાવન્નાન્યહેતુના ॥ ૬૩॥

ન ભાતિ પરમાદ્વૈતં પ્રસાદરહિતસ્ય તુ ।
દુર્લભઃ ખલુ દેવસ્ય પ્રસાદઃ પરમાસ્તિકાઃ ॥ ૬૪॥

અતશ્ચ વેદોદિતવર્ત્મનૈવ
    વિહાય વાદાન્તરજન્મબુદ્ધિમ્ ।
વિમુક્તિકામઃ પરમાદ્વિતીયં
    સમાશ્રયેદેવ શિવસ્વરૂપમ્ ॥ ૬૫॥

॥ ઇતિ શ્રીસૂતસંહિતાયાં યજ્ઞવૈભવખણ્ડસ્યોપરિભાગે
સૂતગીતાયાં સામાન્યસૃષ્ટિકથનં નામ તૃતીયોઽધ્યાયઃ ॥ ૩॥

---

અથ ચતુર્થોઽધ્યાયઃ ।

૪. વિશેષસૃષ્ટિકથનમ્ ।

સૂત ઉવાચ -

ઈશ્વરો જગતઃ કર્તા માયયા સ્વીયયા પુરા ।
અભેદેન સ્થિતઃ પૂર્વકલ્પવાસનયાન્વિતઃ ॥ ૧॥

કાલકર્માનુગુણ્યેન સ્વાભિન્નસ્વીયમાયયા ।
અભિન્નોઽપિ તયા સ્વસ્ય ભેદં કલ્પયતિ પ્રભુઃ ॥ ૨॥

કલ્પિતોઽયં દ્વિજા ભેદો નાભેદં બાધતે સદા ।
કલ્પિતાનામવસ્તુત્વાદવિરોધશ્ચ સિધ્યતે ॥ ૩॥

પુનઃ પૂર્વક્ષણોત્પન્નવાસનાબલતોઽનઘાઃ ।
ઈક્ષિતા પૂર્વવદ્ભૂત્વા સ્વશક્ત્યા પરયા યુતઃ ॥ ૪॥

માયાયા ગુણભેદેન રુદ્રં વિષ્ણું પિતામહમ્ ।
સૃષ્ટ્વાનુપ્રાવિશત્તેષામન્તર્યામિતયા હરઃ ॥ ૫॥

તેષાં રુદ્રઃ પરાભેદાત્પરતત્ત્વવદેવ તુ ।
કરોતિ સર્ગસ્થિત્યન્તં રુદ્રરૂપેણ સત્તમાઃ ॥ ૬॥

સંહરત્યવિશેષેણ જગત્સર્વં ચરાચરમ્ ।
વિષ્ણુરપ્યાસ્તિકાઃ સાક્ષાત્પરભેદેન કેવલમ્ ॥ ૭॥

કરોતિ સર્ગસ્થિત્યન્તં વિષ્ણુરૂપેણ હે દ્વિજાઃ ।
પાલયત્યવિશેષેણ જગત્સર્વં ચરાચરમ્ ॥ ૮॥

બ્રહ્માઽપિ મુનિશાર્દૂલાઃ પરાભેદેન કેવલમ્ ।
કરોતિ સર્ગસ્થિત્યન્તં બ્રહ્મરૂપેણ સત્તમાઃ ।
કરોતિ વિવિધં સર્વં જગત્પૂર્વં યથા તથા ॥ ૯॥

શબ્દાદિભૂતસૃષ્ટિસ્તુપરસ્યૈવ શિવસ્ય તુ ॥ ૧૦॥

સર્વાન્તઃકરણાનાં તુ સમષ્ટેઃ સૃષ્ટિરાસ્તિકાઃ ।
ત્રિમૂર્તીનાં હરસ્યૈવ પ્રાધાન્યેન ન સંશયઃ ॥ ૧૧॥

પ્રાણાનામપિ સર્વેષાં સમષ્ટેઃ સૃષ્ટિરાસ્તિકાઃ ।
અપિ રુદ્રસ્ય તસ્યૈવ પ્રાધાન્યેન ન સંશયઃ ॥ ૧૨॥

સર્વજ્ઞાનેન્દ્રિયાણાં તુ સમષ્ટીનાં જનિર્દ્વિજાઃ ।
ત્રિમૂર્તીનાં હરસ્યૈવ પ્રાધાન્યેન ન સંશયઃ ॥ ૧૩॥

સર્વકર્મેન્દ્રિયાણાં તુ સમષ્ટીનાં જનિર્દ્વિજાઃ ।
ત્રિમૂર્તીનાં હરસ્યૈવ પ્રાધાન્યેન ન સંશયઃ ॥ ૧૪॥

તથાऽપિ પરમં તત્ત્વં ત્રિમૂર્તીનાં તુ કારણમ્ ।
બ્રહ્મવિષ્ણુમહેશાનાં સૃષ્ટાવુપકરોતિ ચ ॥ ૧૫॥

ઉપચારતયા તેऽપિ સ્રષ્ટાર ઇતિ શબ્દિતાઃ ।
તત્રાપિ તત્ત્વતઃ સ્રષ્ટૃ બ્રહ્મૈવાદ્વયમાસ્તિકાઃ ॥ ૧૬॥

વ્યષ્ટયસ્તુ સમષ્ટિભ્યો જાયન્તે બ્રહ્મણાનઘાઃ ।
સમષ્ટિષુ વિજાયન્તે દેવતાઃ પૂર્વકલ્પવત્ ॥ ૧૭॥

સમષ્ટિવ્યષ્ટિરૂપાણાં સૃષ્ટાનાં પાલકો હરિઃ ।
રુદ્રસ્તેષાં તુ સંહર્તા દ્વિજા રૂપાન્તરેણ ચ ॥ ૧૮॥

યા દેવતાऽન્તઃકરણસમષ્ટૌ પૂર્વકલ્પવત્ ।
વિજાતા સ મુનિશ્રેષ્ઠા રુક્મગર્ભ ઇતીરિતઃ ॥ ૧૯॥

જાતા પ્રાણસમષ્ટૌ યા સ સૂત્રાત્મસમાહ્વયઃ ।
દિગ્વાય્વર્કજલાધ્યક્ષપૃથિવ્યાખ્યાસ્તુ દેવતાઃ ।
જાયન્તે ક્રમશઃ શ્રોત્રપ્રમુખેષુ સમષ્ટિષુ ॥ ૨૦॥

પાદપાણ્યાદિષુ પ્રાજ્ઞાઃ કર્મેન્દ્રિય સમષ્ટિષુ ।
ત્રિવિક્રમેન્દ્રપ્રમુખા જાયન્તે દેવતાઃ ક્રમાત્ ॥ ૨૧॥

સમષ્ટિષુ વિજાતા યા દેવતાસ્તા યથાક્રમમ્ ।
વ્યષ્ટિભૂતેન્દ્રિયાણાં તુ નિયન્ત્ર્યો દેવતા દ્વિજાઃ ॥ ૨૨॥

મારુતસ્ત્વગધિષ્ઠાતા દિગ્દેવી કર્ણદેવતા ॥ ૨૩॥

નેત્રાભિમાની સૂર્યઃ સ્યાજ્જિહ્વાયા વરુણસ્તથા ।
ઘ્રાણાભિમાનિની દેવી પૃથિવીતિ પ્રકીર્તિતા ॥ ૨૪॥

પાયોર્મિત્રોऽભિમાન્યાત્મા પાદસ્યાપિ ત્રિવિક્રમઃ ।
ઇન્દ્રો હસ્તનિયન્તા સ્યાચ્છિવઃ સર્વનિયામકઃ ॥ ૨૫॥

મનો બુદ્ધિરહઙ્કારશ્ચિત્તં ચેતિ ચતુર્વિધમ્ ।
સ્યાદન્તઃકરણં પ્રાજ્ઞાઃ ક્રમાત્તેષાં હિ દેવતાઃ ॥ ૨૬॥

ચન્દ્રો વાચસ્પતિર્વિપ્રાઃ સાક્ષાત્કાલાગ્નિરુદ્રકઃ ।
શિવશ્ચેતિ મયા પ્રોક્તાઃ સાક્ષાવેદાન્તપારગાઃ ॥ ૨૭॥

આકાશાદીનિ ભૂતાનિ સ્થૂલાનિ પુનરાસ્તિકાઃ ।

જાયન્તે સૂક્ષ્મભૂતેભ્યઃ પૂર્વકલ્પે યથા તથા ॥ ૨૮॥

અણ્ડભેદસ્તથા લોકભેદાસ્તેષુ ચ ચેતનાઃ ।
અચેતનાનિ ચાન્યાનિ ભૌતિકાનિ ચ પૂર્વવત્ ॥ ૨૯॥

વિજાયન્તે ચ ભોગાર્થં ચેતનાનાં શરીરિણામ્ ।
ભોક્તારઃ પશવઃ સર્વે શિવો ભોજયિતા પરઃ ॥ ૩૦॥

સુખદુઃખાદિસંસારો ભોગઃ સર્વમિદં સુરાઃ ।
સ્વપ્નવદ્દેવદેવસ્ય માયયૈવ વિનિર્મિતમ્ ॥ ૩૧॥

માયયા નિર્મિતં સર્વં માયૈવ હિ નિરૂપણે ।
કારણવ્યતિરેકેણ કાર્યં નેતિ હિ દર્શિતમ્ ॥ ૩૨॥

માયાઽપિ કારણત્વેન કલ્પિતા મુનિપુઙ્ગવાઃ ।
અધિષ્ઠાનાતિરેકેણ નાસ્તિ તત્ત્વનિરૂપણે ॥ ૩૩॥

વ્યવહારદૃશા માયાકલ્પના નૈવ વસ્તુતઃ ।
વસ્તુતઃ પરમાદ્વૈતં બ્રહ્મૈવાસ્તિ ન ચેતરત્ ॥ ૩૪॥

માયારૂપતયા સાક્ષાદ્બ્રહ્મૈવ પ્રતિભાસતે ।
જગજ્જીવાદિરૂપેણાપ્યહો દેવસ્ય વૈભવમ્ ॥ ૩૫॥

સ્વસ્વરૂપાતિરેકેણ બ્રહ્મણો નાસ્તિ કિંચન ।
તથાઽપિ સ્વાતિરેકેણ ભાતિ હા દૈવવૈભવમ્ ॥ ૩૬॥

જગદાત્મતયા પશ્યન્બધ્યતે ન વિમુચ્યતે ॥ ૩૭॥

સર્વમેતત્પરં બ્રહ્મ પશ્યન્સ્વાનુભવેન તુ ।
મુચ્યતે ઘોરસંસારાત્સદ્ય એવ ન સંશયઃ ॥ ૩૮॥

સર્વમેતત્પરં બ્રહ્મ વિદિત્વા સુદૃઢં બુધાઃ ।
માનતર્કાનુભૂત્યૈવ ગુરૂક્ત્યા ચ પ્રસાદતઃ ।
જ્ઞાનપ્રાકટ્યબાહુલ્યાજ્જ્ઞાનં ચ સ્વાત્મનૈવ તુ ॥ ૩૯॥

સ્વાત્મના કેવલેનૈવ તિષ્ઠન્મુચ્યેત બન્ધનાત્ ।
ય એવં વેદ વેદાર્થં મુચ્યતે સ તુ બન્ધનાત્ ॥ ૪૦॥

સોપાનક્રમતશ્ચૈવં પશ્યન્નાત્માનમદ્વયમ્ ।
સર્વં જગદિદં વિપ્રાઃ પશ્યન્નપિ ન પશ્યતિ ॥ ૪૧॥

ભાસમાનમિદં સર્વં ભાનરૂપં પરં પદમ્ ।
પશ્યન્વેદાન્તમાનેન સદ્ય એવ વિમુચ્યતે ॥ ૪૨॥

એવમાત્માનમદ્વૈતમપશ્યન્નેવ પશ્યતઃ ।
જગદાત્મતયા ભાનમપિ સ્વાત્મૈવ કેવલમ્ ॥ ૪૩॥

વિદિત્વૈવં મહાયોગી જગદ્ભાનેઽપિ નિશ્ચલઃ ।
યથાભાતમિદં સર્વમનુજાનાતિ ચાઽઽત્મના ॥ ૪૪॥

નિષેધતિ ચ તત્સિદ્ધિરનુજ્ઞાતસ્ય કેવલમ્ ।
તદસિદ્ધિર્નિષેધોઽસ્ય સિદ્ધ્યસિદ્ધી ચ તસ્ય ન ॥ ૪૫॥

પ્રકાશાત્મતયા સાક્ષાત્સ્થિતિરેવાસ્ય કેવલમ્ ।
વિદ્યતે નૈવ વિજ્ઞાનં નાજ્ઞાનં ન જગત્સદા ॥ ૪૬॥

પ્રકાશાત્મતયા સાક્ષાત્સ્થિતિરત્યપિ ભાષણમ્ ।
અહં વદામિ મોહેન તચ્ચ તસ્મિન્ન વિદ્યતે ॥ ૪૭॥

તસ્ય નિષ્ઠા મયા વક્તું વિજ્ઞાતું ચ ન શક્યતે ।
શ્રદ્ધામાત્રેણ યત્કિંચિજ્જપ્યતે ભ્રાન્તચેતસા ॥ ૪૮॥

ઇતિ ગુહ્યમિદં કથિતં મયા
    નિખિલોપનિષદ્ધૃદયઙ્ગમમ્ ।
હરપઙ્કજલોચનપાલિતં
    વિદિઅતં યદિ વેદવિદેવ સઃ ॥ ૪૯॥

॥ ઇતિ શ્રીસૂતસંહિતાયાં યજ્ઞવૈભવખણ્ડસ્યોપરિભાભાગે
સૂતગીતાયાં વિશેષસૃષ્ટિકથનંનામ ચતુર્થોઽધ્યાયઃ ॥ ૪॥

---

અથ પઞ્ચમોઽધ્યાયઃ ।

૫. આત્મસ્વરૂપકથનમ્ ।

સૂત ઉવાચ -
વક્ષ્યામિ પરમં ગુહ્યં યુષ્માકં મુનિપુઙ્ગવાઃ ।
વિજ્ઞાનં વેદસમ્ભૂતં ભક્તાનામુત્તમોત્તમમ્ ॥ ૧॥

રુદ્ર વિષ્ણુપ્રજાનાથપ્રમુખાઃ સર્વચેતનાઃ ।
સ્વરસેનાહમિત્યાહુરિદમિત્યપિ ચ સ્વતઃ ॥ ૨॥

ઇદંબુદ્ધિશ્ચ બાહ્યાર્થે ત્વહંબુદ્ધિસ્તથાઽઽત્મનિ ।
પ્રસિધ્ધા સર્વજન્તૂનાં વિવાદોઽત્ર ન કશ્ચન ॥ ૩॥

ઇદમર્થે ઘટાદ્યર્થેઽનાત્મત્વં સર્વદેહિનામ્ ।
અહમર્થે તથાઽઽત્મત્વમપિ સિધ્ધં સ્વભાવતઃ ॥ ૪॥

એવં સમસ્તજન્તૂનામનુભૂતિર્વ્યવસ્થિતા ।
ભ્રાન્તા અપિ ન કુર્વન્તિ વિવાદં ચાત્ર સત્તમાઃ ॥ ૫॥

એવં વ્યવસ્થિતે હ્યર્થે સતિ બુદ્ધિમતાં વરાઃ ।
સંસારવિષવૃક્ષસ્ય મૂલચ્છેદનકાઙ્ક્ષિભિઃ ॥ ૬॥

યત્ર યત્રેદમિત્યેષા બુદ્ધિર્દૃષ્ટા સ્વભાવતઃ ।
તત્ર તત્ર ત્વનાત્મત્વં વિજ્ઞાતવ્યં વિચક્ષણૈઃ ॥ ૭॥

યત્ર યત્રાહમિત્યેષા બુદ્ધિર્દૃષ્ટા સ્વભાવતઃ ।
તત્ર તત્ર તથાત્મત્વં વિજ્ઞાતવ્યં મનીષિભિઃ ॥ ૮॥

શરીરે દૃશ્યતે સર્વૈરિદંબુદ્ધિસ્તથૈવ ચ ।
અહંબુદ્ધિશ્ચ વિપ્રેન્દ્રાસ્તતસ્તે ભિન્નગોચરે ॥ ૯॥

શરીરાલમ્બના બુદ્ધિરિદમિત્યાસ્તિકોત્તમાઃ ।
ચિદાત્મલમ્બના સાક્ષાદહંબુદ્ધિર્ન સંશયઃ ॥ ૧૦॥

ઇદમર્થે શરીરે તુ યાઽહમિત્યુદિતા મતિઃ ।
સા મહાભ્રાન્તિરેવ સ્યાદતસ્મિંસ્તદ્ગ્રહત્વતઃ ॥ ૧૧॥

અચિદ્રૂપમહંબુધ્ધીઃ પિણ્ડં નાઽલમ્બનં ભવેત્ ।
મૃત્પિણ્ડાદિષ્વદૃષ્ટત્વાત્તતોઽનાત્મૈવ વિગ્રહઃ ॥ ૧૨॥

અચિત્ત્વાદિન્દ્રિયાણાં ચ પ્રાણસ્ય મનસસ્તથા ।
આલમ્બનત્વં નાસ્ત્યેવ બુદ્ધેશ્ચાહંમતિં પ્રતિ ॥ ૧૩॥

બુદ્ધેરચિત્ત્વં સઙ્ગ્રાહ્યં દૃષ્ટત્વાજ્જન્મનાશયોઃ ।
અચિદ્રૂપસ્ય કુડ્યાદેઃ ખલુ જન્માવનાશનમ્ ॥ ૧૪॥

અહઙ્કારસ્ય ચાચિત્ત્વાચ્ચિત્તસ્ય ચ તથૈવ ચ ।
આલમ્બનત્વં નાસ્ત્યેવ સદાઽહંપ્રત્યયં પ્રતિ ॥ ૧૫॥

સર્વપ્રત્યયરૂપેણ સદાઽહઙ્કાર એવ હિ ।
નિવર્તતેઽતોહઙ્કારસ્ત્વનાત્મૈવ શરીરવત્ ॥ ૧૬॥

પરિણામસ્વભાવસ્ય ક્ષીરાદેર્દ્વિજપુઙ્ગવાઃ ।
અચેતનત્વં લોકેઽસ્મિન્પ્રસિદ્ધં ખલુ સન્તતમ્ ॥ ૧૭॥

તસ્માચ્ચિદ્રૂપ એવાઽઽત્માઽહંબુદ્ધેરર્થ આસ્તિકાઃ ।
અચિદ્રૂપમિદંબુદ્ધેરનાત્મૈવાર્તહ્ ઈરુતઃ ॥ ૧૮॥

સત્યપિ પ્રત્યયાર્થત્વે પ્રત્યગાત્મા સ્વયંપ્રભઃ ।
વૃત્ત્યધીનતયા નૈવ વિભાતિ ઘટકુડ્યવત્ ॥ ૧૯॥

સ્વચ્છવૃત્તિમનુપ્રાપ્ય વૃત્તેઃ સાક્ષિતયા સ્થિતઃ ।
વૃત્ત્યા નિવર્ત્યમજ્ઞાનં ગ્રસતે તેન તેજસા ॥ ૨૦॥

અનુપ્રવિષ્ટચૈતન્યસમ્બન્ધાત્ વૃત્તિરાસ્તિકાઃ ।
જડરૂપં ઘટાદ્યર્થં ભાસયત્યાત્મરૂપવત્ ॥ ૨૧॥

અતોઽહંપ્રત્યયાર્થેઽપિ નાનાત્મા સ્યાદ્ઘટાદિવત્ ।
સ્વયંપ્રકાશરૂપેણ સાક્ષાદાત્મૈવ કેવલમ્ ॥ ૨૨॥

યત્સમ્બન્ધાદહંવૃત્તિઃ પ્રત્યયત્વેન ભાસતે ।
સ કથં પ્રત્યયાધીનપ્રકાશઃ સ્યાત્સ્વયંપ્રભઃ ॥ ૨૩॥

અહંવૃત્તિઃ સ્વતઃસિદ્ધચૈતન્યેદ્ભાઽવભાસતે ।
તત્સમ્બન્ધાદહઙ્કારઃ પ્રત્યયીવ પ્રકાશતે ॥ ૨૪॥

આત્માઽહંપ્રત્યયાકારસમ્બન્ધભ્રાન્તિમાત્રતઃ ।
કર્તા ભોક્તા સુખી દુઃખી જ્ઞાતેતિ પ્રતિભાસતે ॥ ૨૫॥

વસ્તુતસ્તસ્ય નાસ્ત્યેવ ચિન્માત્રાદપરં વપુઃ ।
ચિદ્રૂપમેવ સ્વાજ્ઞાનાદન્યથા પ્રતિભાસતે ॥ ૨૬॥

સર્વદેહેષ્વહંરૂપઃ પ્રત્યયો યઃ પ્રકાશતે ।
તસ્ય ચિદ્રૂપ એવાઽઽત્મા સાક્ષાદર્થો ન ચાપરઃ ॥ ૨૭॥

ગૌરિતિ પ્રત્યયસ્યાર્થો યથા ગોત્વં તુ કેવલમ્ ।
તથાઽહંપ્રત્યયસ્યાર્થશ્ચિદ્રૂપાત્મૈવ કેવલમ્ ॥ ૨૮॥

વ્યક્તિસમ્બન્ધરૂપેણ ગોત્વં ભિન્નં પ્રતીયતે ।
ચિદહઙ્કારસમ્બન્ધાદ્ભેદેન પ્રતિભાતિ ચ ॥ ૨૯॥

યથૈવૈકોઽપિ ગોશબ્દો ભિન્નાર્થો વ્યક્તિભેદતઃ ।

તથૈવૈકોઽપ્યહંશબ્દો ભિન્નાર્થો વ્યક્તિભેદતઃ ॥ ૩૦॥

યથા પ્રતીત્યા ગોવ્યક્તિર્ગોશબ્દાર્થો ન તત્ત્વતઃ ।
તત્ત્વતો ગોત્વમેવાર્થઃ સાક્ષાદ્વેદવિદાં વરાઃ ॥ ૩૧॥

તથા પ્રતીત્યાઽહંકારોઽહંશબ્દાર્થો ન તત્ત્વતઃ ।
તત્ત્વતઃ પ્રત્યગાત્મૈવ સ એવાખિલસાધકઃ ॥ ૩૨॥

એકત્વેઽપિ પૃથક્ત્વેન વ્યપદેશોઽપિ યુજ્યતે ।
અન્તઃકરણભેદેન સાક્ષિણઃ પ્રત્યગાત્મનઃ ॥ ૩૩॥

રુદ્રવિષ્ણુપ્રજાનાથપ્રમુખાઃ સર્વચેતનાઃ ।
ચિન્માત્રાત્મન્યહંશબ્દં પ્રયુઞ્જન્તે હિ તત્ત્વતઃ ॥ ૩૪॥

સુષુપ્તોઽસ્મીતિ સર્વોઽયં સુષુપ્તાદુત્થિતો જનઃ ।
સુષુપ્તિકાલીનસ્વાત્મન્યહંશબ્દં દ્વિજોત્તમાઃ ॥ ૩૫॥

પ્રયુઙ્ક્તે તત્ર દેહાદિવિશેષાકારભાસનમ્ ।
ન હિ કેવલચૈતન્યં સુષુપ્તેઃ સાધકં સ્વતઃ ॥ ૩૬॥

પ્રતિભાતિ તતસ્તસ્મિંશ્ચિન્માત્રે પ્રત્યગાત્મનિ ।
અહંશબ્દપ્રવૃત્તિઃ સ્યાન્ન તુ સોપાધિકાત્મનિ ॥ ૩૭॥

યથાઽયો દહતીત્યુક્તે વહ્નિર્દહતિ કેવલમ્ ।
નાયસ્તદ્વદહંશબ્દશ્ચૈતન્યસ્યૈવ વાચકઃ ॥ ૩૮॥

પ્રતીત્યા વહ્નિસમ્બન્ધાદ્યથાઽયો દાહકં તથા ।
ચિત્સમ્બન્ધાદહઙ્કારોઽહંશબ્દાર્થઃ પ્રકીર્તિતઃ ॥ ૩૯॥

ચૈતન્યેદ્ધાહમ સ્પર્શાદ્દેહાદૌ ભ્રાન્તચેતસામ્ ।
અહંશબ્દપ્રયોગઃ સ્યાત્તથાઽહંપ્રત્યયોઽપિ ચ ॥ ૪૦॥

ઇત્થં વિવેકતઃ સાક્ષ્યં દેહાદિપ્રાણપૂર્વકમ્ ।
અન્તઃકરણમાત્માનં વિભજ્ય સ્વાત્મનઃ પૃથક્ ॥ ૪૧॥

સર્વસાક્ષિણમાત્માનં સ્વયંજ્યોતિઃસ્વલક્ષણમ્ ।
સત્યમાનન્દમદ્વૈતમહમર્થં વિચિન્તયેત્ ॥ ૪૨॥

રુદ્રવિષ્ણુપ્રજાનાથપ્રમુખાઃ સર્વચેતનાઃ ।
અહમેવ પરં બ્રહ્મેત્યાહુરાત્માનમેવ હિ ॥ ૪૩॥

તે તુ ચિન્માત્રમદ્વૈતમહમર્થતયા ભૃશમ્ ।
અઙ્ગીકૃત્યાહમદ્વૈતં બ્રહ્મેત્યાહુર્ન દેહતઃ ॥ ૪૪॥

ચિન્માત્રં સર્વગં સત્યં સમ્પૂર્ણસુખમદ્વયમ્ ।
સાક્ષાદ્બ્રહ્મૈવ નૈવાન્યદિતિ તત્ત્વવિદાં સ્થિતિઃ ॥ ૪૫॥

શાસ્ત્રં સત્યચિદાનન્દમનન્તં વસ્તુ કેવલમ્ ।
શુદ્ધં બ્રહ્મેતિ સશ્રદ્ધં પ્રાહ વેદવિદાં વરાઃ ॥ ૪૬॥

પ્રત્યગાત્માઽયમદ્વન્દ્વઃ સાક્ષી સર્વસ્ય સર્વદા ।
સત્યજ્ઞાનસુખાનન્તલક્ષણઃ સર્વદાઽનઘાઃ ॥ ૪૭॥

અતોઽયં પ્રત્યગાત્મૈવ સ્વાનુભૂત્યેકગોચરઃ ।
શાસ્ત્રસિદ્ધં પરં બ્રહ્મ નાપરં પરમાર્થતઃ ॥ ૪૮॥

એવં તર્કપ્રમાણાભ્યામાચાર્યોક્ત્યા ચ માનવઃ ।
અવિજ્ઞાય શિવાત્મૈક્યં સંસારે પતતિ ભ્રમાત્ ॥ ૪૯॥

શાસ્ત્રાચાર્યોપદેશેન તર્કૈઃ શાસ્ત્રાનુસારિભિઃ ।
સર્વસાક્ષિતયાઽઽત્માનં સમ્યઙ્ નિશ્ચિત્ય સુસ્થિરઃ ॥ ૫૦॥

સ્વાત્મનોઽન્યતયા ભાતં સમસ્તમવિશેષતઃ ।
સ્વાત્મમાત્રતયા બુદ્ધ્વા પુનઃ સ્વાત્માનમદ્વયમ્ ॥ ૫૧॥

શુદ્ધં બ્રહ્મેતિ નિશ્ચિત્ય સ્વયં સ્વાનુભવેન ચ ।
નિશ્ચયં ચ સ્વચિન્માત્રે વિલાપ્યાવિક્રિયેઽદ્વયે ॥ ૫૨॥

વિલાપનં ચ ચિદ્રૂપં બુદ્ધ્વા કેવલરૂપતઃ ।
સ્વયં તિષ્ઠેદયં સાક્ષાદ્બ્રહ્મવિત્પ્રવરો મુનિઃ ॥ ૫૩॥

ઈદૃશી પરમા નિષ્ઠા શ્રૌતી સ્વાનુભવાત્મિકા ।
દેશિકાલોકનેનૈવ કેવલેન હિ સિધ્યતિ ॥ ૫૪॥

દેશિકાલોકનં ચાપિ પ્રસાદાત્પારમેશ્વરાત્ ।
સિધ્યત્યયત્નતઃ પ્રાજ્ઞાઃ સત્યમેવ મયોદિતમ્ ॥ ૫૫॥

સત્યં સત્યં પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ।
પ્રસાદાદેવ સર્વેષાં સર્વસિદ્ધિર્મહેશિતુઃ ॥ ૫૬॥

પ્રસાદે શામ્ભવે સિદ્ધે સર્વં શમ્ભુતયા સ્વતઃ ।
વિભાતિ નાન્યથા વિપ્રાઃ સત્યમેવ મયોદિતમ્ ॥ ૫૭॥

યદા શમ્ભુતયા સર્વં વિભાતિ સ્વત એવ તુ ।
તદા હિ શામ્ભવઃ સાક્ષાત્પ્રસાદઃ સત્યમીરિતમ્ ॥ ૫૮॥

શિવાદન્યતયા કિંચિદપિ ભાતિ યદા દ્વિજાઃ ।
તદા ન શાઙ્કરો બોધઃ સંજાત ઇતિ મે મતિઃ ॥ ૫૯॥

શિવાદન્યતયા સર્વં પ્રતીતમપિ પણ્ડિતઃ ।
તત્ત્વદૃષ્ટ્યા શિવં સર્વં સુસ્થિરં પરિપશ્યતિ ॥ ૬૦॥

શિવાકારેણ વા નિત્યં પ્રપઞ્ચાકારતોઽપિ વા ।
જીવાકારેણ વા ભાતં યત્તદ્બ્રહ્મ વિચિન્તયેત્ ॥ ૬૧॥

શમ્ભુરેવ સદા ભાતિ સર્વાકારેણ નાપરઃ ।
ઇતિ વિજ્ઞાનસમ્પન્નઃ શાઙ્કરજ્ઞાનિનાં વરઃ ॥ ૬૨॥

શમ્ભુરૂપતયા સર્વં યસ્ય ભાતિ સ્વભાવતઃ ।
ન તસ્ય વૈદિકં કિંચિત્તાન્ત્રિકં ચાસ્તિ લૌકિકમ્ ॥ ૬૩॥

યથાભાતસ્વરૂપેણ શિવં સર્વં વિચિન્તયન્ ।
યોગી ચરતિ લોકાનામુપકારાય નાન્યથા ॥ ૬૪॥

સ્વસ્વરૂપાતિરેકેણ નિષિદ્ધં વિહિતં તુ વા ।
ન પશ્યતિ મહાયોગી ભાતિ સ્વાત્મતયાઽખિલમ્ ॥ ૬૫॥

ચણ્ડાલગેહે વિપ્રાણાં ગૃહે વા પરમાર્થવિત્ ।
ભક્ષ્યભોજ્યાદિવૈષમ્યં ન કિંચિદપિ પશ્યતિ ॥ ૬૬॥

યથેષ્ટં વર્તતે યોગી શિવં સર્વં વિચિન્તયન્ ।
તાદૃશો હિ મહાયોગી કો વા તસ્ય નિવારકઃ ॥ ૬૭॥

બહુનોક્તેન કિં સાક્ષાદ્દેશિકસ્ય નિરીક્ષણાત્ ।
પ્રસાદાદેવ રુદ્રસ્ય પરશક્તેસ્તથૈવ ચ ॥ ૬૮॥

શ્રુતિભક્તિબલાત્પુણ્યપરિપાકબલાદપિ ।
શિવરૂપતયા સર્વં સ્વભાવાદેવ પશ્યતિ ॥ ૬૯॥

શિવઃ સર્વમિતિ જ્ઞાનં શાઙ્કરં શોકમોહનુત્ ।
અયમેવ હિ વેદાર્થો નાપરઃ સત્યમીરિતમ્ ॥ ૭૦॥

શ્રુતૌ ભક્તિર્ગુરૌ ભક્તિઃ શિવે ભક્તિશ્ચ દેહિનામ્ ।

સાધનં સત્યવિદ્યાયાઃ સત્યમેવ મયોદિતમ્ ॥ ૭૧॥

સોપાનક્રમતો લબ્ધં વિજ્ઞાનં યસ્ય સુસ્થિરમ્ ।
તસ્ય મુક્તિઃ પરા સિદ્ધા સત્યમેવ મયોદિતમ્ ॥ ૭૨॥

નિત્યમુક્તસ્ય સંસારો ભ્રાન્તિસિદ્ધઃ સદા ખલુ ।
તસ્માજ્જ્ઞાનેન નાશઃ સ્યાત્સંસારસ્ય ન કર્મણા ॥ ૭૩॥

જ્ઞાનલાભાય વેદોક્તપ્રકારેણ સમાહિતઃ ।
મહાકારુણિકં સાક્ષાદ્ગુરુમેવ સમાશ્રયેત્ ॥ ૭૪॥

॥ ઇતિ શ્રીસૂતસંહિતાયાં યજ્ઞવૈભવખણ્ડસ્યોપરિભાગે
સૂતગીતાયાં આત્મસ્વરૂપકથનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

---

અથ ષષ્ઠોઽધ્યાયઃ ।

૬. સર્વશાસ્ત્રાર્થસંગ્રહવર્ણનમ્ ।

સૂત ઉવાચ -
વક્ષ્યામિ પરમં ગુહ્યં સર્વશાસ્ત્રાર્થસઙ્ગ્રહમ્ ।
યં વિદિત્વા દ્વિજા મર્ત્યો ન પુનર્જાયતે ભુવિ ॥ ૧॥

સાક્ષાત્પરતરં તત્ત્વં સચ્ચિદાનન્દલક્ષણમ્ ।
સર્વેષાં નઃ સદા સાક્ષાદાત્મભૂતમપિ સ્વતઃ ॥ ૨॥

દુર્દર્શમેવ સૂક્ષ્મત્વાદ્દેવાનાં મહતામપિ ।
રુદ્રઃ સ્વાત્મતયા ભાતં તત્સદા પરિપશ્યતિ ॥ ૩॥

વિષ્ણુઃ કદાચિત્તત્ત્વં કથંચિત્પરિપશ્યતિ ।
તથા કથંચિદ્બ્રહ્માઽપિ કદાચિત્પરિપશ્યતિ ॥ ૪॥

ત્રિમૂર્તીનાં તુ યજ્જ્ઞાનં બ્રહ્મૈકવિષયં પરમ્ ।
તસ્યાપિ સાધકં તત્ત્વં સાક્ષિત્વાન્નૈવ ગોચરમ્ ॥ ૫॥

પ્રસાદાદેવ તસ્યૈવ પરતત્ત્વસ્ય કેવલમ્ ।
દેવાદયોઽપિ પશ્યન્તિ તત્રાપિ બ્રહ્મ સાધકમ્ ॥ ૬॥

અતઃ પ્રસાદસિદ્ધ્યર્થં પરયા શ્રદ્ધયા સહ ।
ધ્યેયમેવ પરં તત્ત્વં હૃદયામ્ભોજમધ્યગમ્ ॥ ૭॥

ત્રિમૂર્તીનાં તુ રુદ્રોઽપિ શિવં પરમકારણમ્ ।

સદા મૂર્ત્યાત્મના પ્રીત્યા ધ્યાયતિ દ્વિજપુઙ્ગવાઃ ॥ ૮॥

ત્રિમૂર્તીનાં તુ વિષ્ણુશ્ચ શિવં પરમકારણમ્ ।
સદા મૂર્ત્યાત્મના પ્રીત્યા ધ્યાયતિ દ્વિજપુઙ્ગવાઃ ॥ ૯॥

ત્રિમૂર્તીનાં વિરિઞ્ચોઽપિ શિવં પરમકારણમ્ ।
સદા મૂર્ત્યાત્મના પ્રીત્યા ધ્યાયતિ દ્વિજપુઙ્ગવાઃ ॥ ૧૦॥

બ્રહ્મવિષ્ણુમહેશાનાં ત્રિમૂર્તીનાં વિચક્ષણાઃ ।
વિભૂતિરૂપા દેવાશ્ચ ધ્યાયન્તિ પ્રીતિસંયુતાઃ ॥ ૧૧॥

ધૃતકાઠિન્યવન્મૂર્તિઃ સચ્ચિદાનન્દલક્ષણા ।
શિવાદ્ભેદેન નૈવાસ્તિ શિવ એવ હિ સા સદા ॥ ૧૨॥

બ્રહ્મવિષ્ણુમહેશાદ્યાઃ શિવધ્યાનપરા અપિ ।
પરમાત્મવિભાગસ્થા ન જીવવ્યૂહસંસ્થિતાઃ ॥ ૧૩॥

બ્રહ્મવિષ્ણુમહેશાનામાવિર્ભાવા અપિ દ્વિજાઃ ।
પરમાત્મવિભાગસ્થા ન જીવવ્યૂહસંસ્થિતાઃ ॥ ૧૪॥

પરતત્ત્વ પરં બ્રહ્મ જીવાત્મપરમાત્મનોઃ ।
ઔપાધિકેન ભેદેન દ્વિધાભૂતમિવ સ્થિતમ્ ॥ ૧૫॥

પુણ્યપાપાવૃતા જીવા રાગદ્વેષમલાવૃતાઃ ।
જન્મનાશાભિભૂતાશ્ચ સદા સંસારિણોઽવશાઃ ॥ ૧૬॥

બ્રહ્મવિષ્ણુમહેશાનાં તથા તેષાં દ્વિજર્ષભાઃ ।
આવિર્ભાવવિશેષાણાં પુણ્યપાપાદયો ન હિ ॥ ૧૭॥

આજ્ઞયા પરતત્ત્વસ્ય જીવાનાં હિતકામ્યયા ।
આવિર્ભાવતિરોભાવૌ તેષાં કેવલમાસ્તિકાઃ ॥ ૧૮॥

હરિબ્રહ્મહરાસ્તેષામાવિર્ભાવાશ્ચ સુવ્રતાઃ ।
સદા સંસારિભિર્જીવૈરુપાસ્યા ભુક્તિમુક્તયે ॥ ૧૯॥

ઉપાસ્યત્વે સમાનેઽપિ હરઃ શ્રેષ્ઠો હરેરજાત્ ।
ન સમો ન વિહીનશ્ચ નાસ્તિ સન્દેહકારણમ્ ॥ ૨૦॥

વિહીનં વા સમં વાઽપિ હરિણા બ્રહ્મણા હરમ્ ।
યે પશ્યન્તિ સદા તે તુ પચ્યન્તે નરકાનલે ॥ ૨૧॥

હરિબ્રહ્માદિદેવેભ્યઃ શ્રેષ્ઠં પશ્યન્તિ યે હરમ્ ।
તે મહાઘોરસંસારાન્મુચ્યન્તે નાત્ર સંશયઃ ॥ ૨૨॥

પ્રાધાન્યેન પરં તત્ત્વં મૂર્તિદ્વારેણ યોગિભિઃ ।
ધ્યેયં મુમુક્ષિભિર્નિત્યં હૃદયામ્ભોજમધ્યમે ॥ ૨૩॥

કાર્યભૂતા હરિબ્રહ્મપ્રમુખાઃ સર્વદેવતાઃ ।
અપ્રધાનતયા ધ્યેયા ન પ્રધાનતયા સદા ॥ ૨૪॥

સર્વૈશ્વર્યેણ સમ્પન્નઃ સર્વેશઃ સર્વકારણમ્ ।
શમ્ભુરેવ સદા સામ્બો ન વિષ્ણુર્ન પ્રજાપતિઃ ॥ ૨૫॥

તસ્માત્તત્કારણં ધ્યેયં પ્રાધાન્યેન મુમુક્ષુભિઃ ।
ન કાર્યકોટિનિક્ષિપ્તા બ્રહ્મવિષ્ણુમહેશ્વરાઃ ॥ ૨૬॥

શિવંકરત્વં સર્વેષાં દેવાનાં વેદવિત્તમાઃ ।
સ્વવિભૂતિમપેક્ષ્યૈવ ન પરબ્રહ્મવત્સદા ॥ ૨૭॥

શિવંકરત્વં સમ્પૂર્ણં શિવસ્યૈવ પરાત્મનઃ ।
સામ્બમૂર્તિધરસ્યાસ્ય જગતઃ કારણસ્ય હિ ॥ ૨૮॥

અતોઽપિ સ શિવો ધ્યેયઃ પ્રાધાન્યેન શિવંકરઃ ।
સર્વમન્યત્પરિત્યજ્ય દૈવતં પરમેશ્વરાત્ ॥ ૨૯॥

સાક્ષાત્પરશિવસ્યૈવ શેષત્વેનામ્બિકાપતેઃ ।
દેવતાઃ સકલા ધ્યેયા ન પ્રાધાન્યેન સર્વદા ॥ ૩૦॥

શિખાઽપ્યાથર્વણી સાધ્વી સર્વવેદોત્તમોત્તમા ।
અસ્મિન્નર્થે સમાપ્તા સા શ્રુતયશ્ચાપરા અપિ ॥ ૩૧॥

યથા સાક્ષાત્પરં બ્રહ્મ પ્રતિષ્ઠા સકલસ્ય ચ ।
તથૈવાથર્વણો વેદઃ પ્રતિષ્ઠૈવાખિલશ્રુતેઃ ॥ ૩૨॥

કન્દસ્તારસ્તથા બિન્દુઃ શક્તિસ્તારો મહાદ્રુમઃ ।
સ્કન્ધશાખા અકારાદ્યા વર્ણા યદ્વત્તથૈવ તુ ॥ ૩૩॥

તારસ્કન્દઃ શ્રુતેર્જાતિઃ શક્તિરાથર્વણો દ્રુમઃ ।
સ્કન્ધશાખાસ્ત્રયો વેદાઃ પર્ણાઃ સ્મૃતિપુરાણકાઃ ॥ ૩૪॥

અઙ્ગાનિ શાખાવરણં તર્કાસ્તસ્યૈવરક્ષકાઃ ।
પુષ્પં શિવપરિજ્ઞાનં ફલં મુક્તિઃ પરા મતા ॥ ૩૫॥

બહુનોક્તેન કિં વિપ્રાઃ શિવો ધ્યેયઃ શિવંકરઃ ।
સર્વમન્યત્પરિત્યજ્ય દૈવતં ભુક્તિમુક્તયે ॥ ૩૬॥

સર્વમુક્તં સમાસેન સારાત્સારતરં બુધાઃ ।
શિવધ્યાનં સદા યૂયં કુરુધ્વં યત્નતઃ સદા ॥ ૩૭॥

॥ ઇતિ શ્રીસૂતસંહિતાયાં યજ્ઞવૈભવખણ્ડસ્યોપરિભાગે
સૂતગીતાયાં સર્વશાસ્ત્રાર્થસઙ્ગ્રહો નામ ષષ્ઠોઽધ્યાયઃ ॥ ૬ ॥

---

અથ સપ્તમોઽધ્યાયઃ ।

૭. રહસ્યવિચારઃ ।

સૂત ઉવાચ -
રહસ્યં સમ્પ્રવક્ષ્યામિ સમાસેન ન વિસ્તરાત્ ।
શ્રુણુત શ્રદ્ધયા વિપ્રાઃ સર્વસિદ્ધ્યર્થમુત્તમમ્ ॥ ૧॥

દેવતાઃ સર્વદેહેષુ સ્થિતાઃ સત્યતપોધનાઃ ।
સર્વેષાં કારણં સાક્ષાત્પરતત્ત્વમપિ સ્થિતમ્ ॥ ૨॥

પઞ્ચભૂતાત્મકે દેહે સ્થૂલે ષાટ્કૌશિકે સદા ।
પૃથિવ્યાદિક્રમેણૈવ વર્તન્તે પઞ્ચ દેવતાઃ ॥ ૩॥

કાર્યં બ્રહ્મા મહીભાગે કાર્યં વિષ્ણુર્જલાંશકે ।
કાર્યં રુદ્રોઽગ્નિભાગે ચ વાય્વંશે ચેશ્વરઃ પરઃ ।
આકાશાંશે શરીરસ્ય સ્થિતઃ સાક્ષાત્સદાશિવઃ ॥ ૪॥

શરીરસ્ય બહિર્ભાગે વિરાડાત્મા સ્થિતઃ સદા ॥ ૫॥

અન્તર્ભાગે સ્વરાડાત્મા સમ્રાડ્દેહસ્ય મધ્યમે ।
જ્ઞાનેન્દ્રિયસમાખ્યેષુ શ્રોત્રાદિષુ યથાક્રમાત્ ॥ ૬॥

દિગ્વાય્વર્કજલાધ્યક્ષભૂમિસંજ્ઞાશ્ચ દેવતાઃ ।
કર્મેન્દ્રિયસમાખ્યેષુ પાદપાણ્યાદિષુ ક્રમાત્ ॥ ૭॥

ત્રિવિક્રમેન્દ્રવહ્ન્યાખ્યા દેવતાશ્ચ પ્રજાપતિઃ ।
મિત્રસંજ્ઞશ્ચ વર્તન્તે પ્રાણે સૂત્રાત્મસંજ્ઞિતઃ ॥ ૮॥

હિરણ્યગર્ભો ભગવાનન્તઃકરણસંજ્ઞિતે ।

તદવસ્થાપ્રભેદેષુ ચન્દ્રમા મનસિ સ્થિતઃ ॥ ૯॥

બુદ્ધૌ બૃહસ્પતિર્વિપ્રાઃ સ્થિતઃ કાલાગ્નિરુદ્રકઃ ।
અહઙ્કારે શિવશ્ચિત્તે રોમસુ ક્ષુદ્રદેવતાઃ ॥ ૧૦॥

ભૂતપ્રેતાદયઃ સર્વે દેહસ્યાસ્થિષુ સંસ્થિતાઃ ।
પિશાચા રાક્ષસાઃ સર્વે સ્થિતાઃ સ્નાયુષુ સર્વશઃ ॥ ૧૧॥

મજ્જાખ્યે પિતૃગન્ધર્વાસ્ત્વઙ્માંસરુધિરેષુ ચ ।
વર્તન્તે તત્ર સંસિદ્ધા દેવતાઃ સકલા દ્વિજાઃ ॥ ૧૨॥

ત્રિમૂર્તીનાં તુ યો બ્રહ્મા તસ્ય ઘોરા તનુર્દ્વિજાઃ ।
દક્ષિણાક્ષિણિ જન્તૂનામન્તર્ભાગે રવિર્બહિઃ ॥ ૧૩॥

ત્રિમૂર્તીનાં તુ યો બ્રહ્મા તસ્ય શાન્તા તનુર્દ્વિજાઃ ।
વર્તતે વામનેત્રાન્તર્ભાગે બાહ્યે નિશાકરઃ ॥ ૧૪॥

ત્રિમૂર્તીનાં તુ યો વિષ્ણુઃ સ કણ્ઠે વર્તતે સદા ।
અન્તઃ શાન્તતનુર્ઘોરા તનુર્બાહ્યે દ્વિજર્ષભાઃ ॥ ૧૫॥

ત્રિમૂર્તીનાં તુ યો રુદ્રો હૃદયે વર્તતે સદા ।
અન્તઃ શાન્તતનુર્ઘોરા તનુર્બાહ્યે દ્વિજર્ષભાઃ ॥ ૧૬॥

સર્વેષાં કારણં યત્તદ્બ્રહ્મ સત્યાદિલક્ષણમ્ ।
બ્રહ્મરન્ધ્રે મહાસ્થાને વર્તતે સતતં દ્વિજાઃ ॥ ૧૭॥

ચિચ્છક્તિઃ પરમા દેહમધ્યમે સુપ્રતિષ્ઠિતા ।
માયાશક્તિર્લલાટાગ્રભાગે વ્યોમામ્બુજાદધઃ ॥ ૧૮॥

નાદરૂપા પરા શક્તિર્લલાટસ્ય તુ મધ્યમે ।
ભાગે બિન્દુમયી શક્તિર્લલાટસ્યાપરાંશકે ॥ ૧૯॥

બિન્દુમધ્યે તુ જીવાત્મા સૂક્ષ્મરૂપેણ વર્તતે ।
હૃદયે સ્થૂલરૂપેણ મધ્યમેન તુ મધ્યમે ॥ ૨૦॥

દેવી સરસ્વતી સાક્ષાદ્બ્રહ્મપત્ની સનાતની ।
જિહ્વાગ્રે વર્તતે નિત્યં સર્વવિદ્યાપ્રદાયિની ॥ ૨૧॥

વિષ્ણુપત્ની મહાલક્ષ્મીર્વર્તતેઽનાહતે સદા ।
રુદ્રપત્ની તુ રુદ્રેણ પાર્વતી સહ વર્તતે ॥ ૨૨॥

સર્વત્ર વર્તતે સાક્ષાચ્છિવઃ સામ્બઃ સનાતનઃ ।
સત્યાદિલક્ષણઃ શુદ્ધઃ સર્વદેવનમસ્કૃતઃ ॥ ૨૩॥

સમ્યગ્જ્ઞાનવતાં દેહે દેવતાઃ સકલા અમૂઃ ।
પ્રત્યગાત્મતયા ભાન્તિ દેવતારૂપતોઽપિ ચ ॥ ૨૪॥

વેદ માર્ગૈકનિષ્ઠાનાં વિશુદ્ધાનાં તુ વિગ્રહે ।
દેવતારૂપતો ભાન્તિ દ્વિજા ન પ્રત્યગાત્મના ॥ ૨૫॥

તાન્ત્રિકાણાં શરીરે તુ દેવતાઃ સકલા અમૂઃ ।
વર્તન્તે ન પ્રકાશન્તે દ્વિજેન્દ્રાઃ શુદ્ધ્યભાવતઃ ॥ ૨૬॥

યથાજાતજનાનાં તુ શરીરે સર્વદેવતાઃ ।
તિરોભૂતતયા નિત્યં વર્તન્તે મુનિસત્તમાઃ ॥ ૨૭॥

અતશ્ચ ભોગમોક્ષાર્થી શરીરં દેવતામયમ્ ।
સ્વકીયં પરકીયં ચ પૂજયેત્તુ વિશેષતઃ ॥ ૨૮॥

નાવમાનં સદા કુર્યાન્મોહતો વાઽપિ માનવઃ ।
યદિ કુર્યાત્પ્રમાદેન પતત્યેવ ભવોદધૌ ॥ ૨૯॥

દુર્વૃત્તમપિ મૂર્ખં ચ પૂજયેદ્દેવતાત્મના ।
દેવતારૂપતઃ પશ્યન્મુચ્યતે ભવબન્ધનાત્ ॥ ૩૦॥

મોહેનાપિ સદા નૈવ કુર્યાદપ્રિયભાષણમ્ ।
યદિ કુર્યાત્પ્રમાદેન હન્તિ તં દેવતા પરા ॥ ૩૧॥

ન ક્ષતં વિગ્રહે કુર્યાદસ્ત્રશસ્ત્રનખાદિભિઃ ।
તથા ન લોહિતં કુર્યાદ્યદિ કુર્યાત્પતત્યધઃ ॥ ૩૨॥

સ્વદેહે પરદેહે વા ન કુર્યાદઙ્કનં નરઃ ।
યદિ કુર્યાચ્ચ ચક્રાદ્યૈઃ પતત્યેવ ન સંશયઃ ॥ ૩૩॥

રહસ્યં સર્વશાસ્ત્રાણાં મયા પ્રોક્તં સમાસતઃ ।
શરીરં દેવતારૂપં ભજધ્વં યૂયમાસ્તિકઃ ॥ ૩૪॥

॥ ઇતિ શ્રીસૂતસંહિતાયાં યજ્ઞવૈભવખણ્ડસ્યોપરિભાગે
સૂતગીતાયાં રહસ્યવિચારો નામ સપ્તમોઽધ્યાયઃ ॥ ૭॥

---

અથ અષ્ટમોઽધ્યાયઃ ।

૮. સર્વવેદાન્તસઙ્ગ્રહઃ ।

સૂત ઉવાચ -

અથ વક્ષ્યે સમાસેન સર્વવેદાન્તસઙ્ગ્રહમ્ ।
યં વિદિત્વા નરઃ સાક્ષાન્નિર્વાણમધિગચ્છતિ ॥ ૧॥

પરાત્પરતરં તત્ત્વં શિવઃ સત્યાદિલક્ષણઃ ।
તસ્યાસાધારણી મૂર્તિરમ્બિકાસહિતા સદા ॥ ૨॥

સ્વસ્વરૂપમહાનન્દપ્રમોદાત્તાણ્ડવપ્રિયા ।
શિવાદિનામાન્યેવાસ્ય નામાનિ મુનિપુઙ્ગવાઃ ॥ ૩॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ પરતત્ત્વવિભૂતયઃ ।
ત્રિમૂર્તીનાં તુ રુદ્રસ્તુ વરિષ્ઠો બ્રહ્મણો હરેઃ ॥ ૪॥

સંસારકારણં માયા સા સદા સદ્વિલક્ષણા ।
પ્રતીત્યૈવ તુ સદ્ભાવસ્તસ્યા નૈવ પ્રમાણતઃ ॥ ૫॥

સાઽપિ બ્રહ્માતિરેકેણ વસ્તુતો નૈવ વિદ્યતે ।
તત્ત્વજ્ઞાનેન માયાયા બાધો નાન્યેન કર્મણા ॥ ૬॥

જ્ઞાનં વેદાન્તવાક્યોત્થં બ્રહ્માત્મૈકત્વગોચરમ્ ।
તચ્ચ દેવપ્રસાદેન ગુરોઃ સાક્ષાન્નિરીક્ષણાત્ ।
જાયતે શક્તિપાતેન વાક્યાદેવાધિકારિણામ્ ॥ ૭॥

જ્ઞાનેચ્છાકારણં દાનં યજ્ઞાશ્ચ વિવિધા અપિ ।
તપાંસિ સર્વવેદાનાં વેદાન્તાનાં તથૈવ ચ ॥ ૮॥

પુરાણાનાં સમસ્તાનાં સ્મૃતીનાં ભારતસ્ય ચ ।
વેદાઙ્ગાનાં ચ સર્વેષામપિ વેદાર્થપારગાઃ ॥ ૯॥

અધ્યાપનં ચાધ્યયનં વેદાર્થે ત્વરમાણતા ।
ઉપેક્ષા વેદબાહ્યાર્થે લૌકિકેષ્વખિલેષ્વપિ ॥ ૧૦॥

શાન્તિદાન્ત્યાદયો ધર્મા જ્ઞાનસ્યાઙ્ગાનિ સુવ્રતાઃ ॥ ૧૧॥

જ્ઞાનાઙ્ગેષુ સમસ્તેષુ ભક્ત્યા લિઙ્ગે શિવાર્ચનમ્ ।
પ્રતિષ્ઠા દેવદેવસ્ય શિવસ્થાનનિરીક્ષણમ્ ॥ ૧૨॥

શિવભક્તસ્ય પૂજા ચ શિવભક્તિસ્તથૈવ ચ ।
રુદ્રાક્ષધારણં ભક્ત્યા કર્ણે કણ્ઠે તથા કરે ॥ ૧૩॥

અગ્નિરિત્યાદિભિર્મન્ત્રૈર્ભસ્મનૈવાવગુણ્ઠનમ્ ।
ત્રિપુણ્ડ્રધારણં ચાપિ લલાટાદિસ્થલેષુ ચ ॥ ૧૪॥

વેદવેદાન્તનિષ્ઠસ્ય મહાકારુણિકસ્ય ચ ।
ગુરોઃ શુશ્રૂષણં નિત્યં વરિષ્ઠં પરિકીર્તિતમ્ ॥ ૧૫॥

ચિન્મન્ત્રસ્ય પદાખ્યસ્ય હંસાખ્યસ્ય મનોર્જપઃ ।
ષડક્ષરસ્ય તારસ્ય વરિષ્ઠઃ પરિકીર્તિતઃ ॥ ૧૬॥

અવિમુખ્યસમાખ્યં ચ સ્થાનં વ્યાઘ્રપુરાભિધમ્ ।
શ્રીમદ્દક્ષિણકૈલાસસમાખ્યં ચ સુશોભનમ્ ॥ ૧૭॥

માર્ગાન્તરોદિતાચારાત્સ્માર્તો ધર્મઃ સુશોભનઃ ।
સ્માર્તાચ્છ્રૌતઃ પરો ધર્મઃ શ્રૌતાચ્છ્રેષ્ઠો ન વિદ્યતે ॥ ૧૮॥

અતીન્દ્રિયાર્થે ધર્માદૌ શિવે પરમકારણે ।
શ્રુતિરેવ સદા માનં સ્મૃતિસ્તદનુસારિણી ॥ ૧૯॥

આસ્તિક્યં સર્વધર્મસ્ય કન્દભૂતં પ્રકીર્તિતમ્ ।
પ્રતિષિદ્ધક્રિયાત્યાગઃ કન્દસ્યાપિ ચ કારણમ્ ॥ ૨૦॥

શિવઃ સર્વમિતિ જ્ઞાનં સર્વજ્ઞાનોત્તમોત્તમમ્ ।
તત્તુલ્યં તત્પરં ચાપિ ન કિંચિદપિ વિદ્યતે ॥ ૨૧॥

વક્તવ્યં સકલં પ્રોક્તં મયાઽતિશ્રદ્ધયા સહ ।
અતઃ પરં તુ વક્તવ્યં ન પશ્યામિ મુનીશ્વરાઃ ॥ ૨૨॥

ઇત્યુક્ત્વા ભગવાન્સૂતો મુનીનાં ભાવિતાત્મનામ્ ।
સામ્બં સર્વેશ્વરં ધ્યાત્વા ભક્ત્યા પરવશોઽભવત્ ॥ ૨૩॥

અથ પરશિવભક્ત્યા સચ્ચિદાનન્દપૂર્ણં
    પરશિવમનુભૂય ત્વાત્મરૂપેણ સૂતઃ ।
મુનિગણમવલોક્ય પ્રાહ સાક્ષાદ્ઘૃણાબ્ધિ-
    ર્જનપદહિતરૂપં વેદિતવ્યં તુ કિંચિત્ ॥ ૨૪॥

શ્રુતિપથગલિતાનાં માનુષાણાં તુ તન્ત્રં
    ગુરુગુરુરખિલેશઃ સર્વવિત્પ્રાહ શમ્ભુઃ ।
શ્રુતિપથનિરતાનાં તત્ર નૈવાસ્તિ કિંચિ-
    દ્ધિતકરમિહ સર્વં પુષ્કલં સત્યમુક્તમ્ ॥ ૨૫॥

શ્રુતિરપિ મનુજાનાં વર્ણધર્મં બભાષે
પરગુરુરખિલેશઃ પ્રાહ તન્ત્રેષુ તદ્વત્ ।
શ્રુતિપથગલિતાનાં વર્ણધર્મં ઘૃણાબ્ધિઃ
શ્રુતિપથનિરતાનાં નૈવ તત્સેવનીયમ્ ॥ ૨૬॥

શ્રુતિપથનિરતાનામાશ્રમા યદ્વદુક્તાઃ
પરગુરુરખિલેશસ્તદ્વદાહાऽऽશ્રમાંશ્ચ ।
શ્રુતિપથગલિતાનાં માનુષાણાં તુ તન્ત્રં
હરિરપિ મુનિમુખ્યાઃ પ્રાહ તન્ત્રે સ્વકીયે ॥ ૨૭॥

વિધિરપિ મનુજાનામાહ વર્ણાશ્રમાંશ્ચ
શ્રુતિપથગલિતાનામેવ તન્ત્રે સ્વકીયે ।
શ્રુતિપથનિરતાનાં તે ન સંસેવનીયાઃ ।
શ્રુતિપથસમમાર્ગૌ નૈવ સત્યં મયોતમ્ ॥ ૨૮॥

હરહરિવિધિપૂજા કીર્તિતા સર્વતન્ત્ર
શ્રુતિપથનિરતાનં યદ્વદુક્તાતુ પૂજા ।
શ્રુતિપથગલિતાનાંયદ્વદુક્તા તુ પૂજા ।
શ્રુતિપથગલિતાનામેવ તન્ત્રોક્તપૂજા
શ્રુતિપથનિરતાનાં સર્વવેદોદિતૈવ ॥ ૨૯॥

શ્રુતિપથગલિતાનાં સર્વતન્ત્રેષુ લિઙ્ગં
કથિતમખિલદુઃખધ્વંસધ્વંસકં તત્ર તત્ર ।
શ્રુતિપથનિરતાનાં તત્સદા નૈવ ધાર્યં
શ્રુતિરપિમનુજાનામાહ લિઙ્ગં વિશુદ્ધમ્ ॥ ૩૦॥

શિવાગમોક્તાશ્રમનિષ્ઠમાનવ-
સ્ત્રિપુણ્ડ્રલિઙ્ગં તુ સદૈવ ધારયેત્ ।
તદુક્તતન્ત્રેણ લલાટમધ્યમે
મહાદરેણૈવ સિતેન ભસ્મના ॥ ૩૧॥

વિષ્ણ્વાગમોક્તાશ્રમનિષ્ઠમાનવ-
સ્તથૈવ પુણ્ડ્રાન્તરમૂર્ધ્વરૂપકમ્ ।
ત્રિશૂલરૂપં ચતુરશ્રમેવ વા
મૃદા લલાટે તુ સદૈવ ધારયેત્ ॥ ૩૨॥

બ્રહ્માગમોક્તાશ્રમનિષ્ઠમાનવો

ललाटमध्येऽपि च वर्तुलाकृतिम् ।
तदुक्तमन्त्रेण सितेन भस्मना
मृदाऽथवा चन्दनस्तु धारयेत् ॥ ३३॥

अश्वत्थपत्रसदृशं हरिचन्दनेन
मध्येललाटमतिशोभनमादरेण ।
बुद्ध्यागमे मुनिवरा यदि संस्कृतश्चे-
न्मृद्धारिणा सततमेव तु धारयेच्च ॥ ३४॥

ऊर्ध्वपुण्ड्रत्रयं नित्यं धारयेद्भस्मना मृदा ।
ललाटे हृदये बाह्वोश्चन्दनेनाथवा नरः ॥ ३५॥

सितेन भस्मना तिर्यक्त्रिपुण्ड्रस्य च धारणम् ।
सर्वागमेषु निष्ठानां तत्तन्मन्त्रेण शोभनम् ॥ ३६॥

शिवागमेषु निष्ठानां धार्यं तिर्यक्त्रिपुण्ड्रकम् ।
एकमेव सदा भूत्या नैव पुण्ड्रान्तरं बुधाः ॥ ३७॥

वेदमार्गैकनिष्ठानां वेदोक्तेनैव वर्त्मना ।
ललाटे भस्मना तिर्यक्त्रिपुण्ड्रं धार्यमेव हि ॥ ३८॥

ललाटे भस्मना तिर्यक्त्रिपुण्ड्रस्य तु धारणम् ।
विना पुण्ड्रान्तरं मोहाद्धारयन्पतति द्विजः ॥ ३९॥

विष्णवागमादितन्त्रेषु दीक्षितानां विधीयते ।
शङ्खचक्रगदापूर्वैरङ्कनं नान्यदेहिनाम् ॥ ४०॥

दीक्षितानां तु तन्त्रेषु नराणामङ्कन द्विजाः ।
उपकारकमेवोक्तं क्रमेण मुनिपुङ्गवाः ॥ ४१॥

पुण्ड्रान्तरस्य तन्त्रेषु धारणं दीक्षितस्य तु ।
उपकारकमेवोक्तं क्रमेण मुनिपुङ्गवाः ॥ ४२॥

वेदमार्गैकनिष्ठस्तु मोहेनाप्यङ्कितो यदि ।
पतत्येव न सन्देहस्तथा पुण्ड्रान्तरादपि ॥ ४३॥

नाङ्कनं विग्रहे कुर्याद्वेदपन्थानमाश्रितः ।
पुण्ड्रान्तरं भ्रमाद्वापि ललाटे न धारयेत् ॥ ४४॥

तन्त्रोक्तेन प्रकारेण देवता या प्रतिष्ठिता ।

સાઽપિ વન્દ્યા સુસેવ્યા ચ પૂજનીયા ચ વૈદિકૈઃ ॥ ૪૫॥

શુદ્ધમેવ હિ સર્વત્ર દેવતારૂપમાસ્તિકાઃ ।
તત્તત્તન્ત્રોક્તપૂજા તુ તન્ત્રનિષ્ઠસ્ય કેવલમ્ ॥ ૪૬॥

તન્ત્રેષુ દીક્ષિતો મર્ત્યો વૈદિકં ન સ્પૃશેત્સદા ।
વૈદિકશ્ચાપિ તન્ત્રેષુ દીક્ષિતં ન સ્પૃશેત્સદા ॥ ૪૭॥

રાજા તુ વૈદિકાન્સર્વાંસ્તાન્ત્રિકાનખિલાનપિ ।
અસંકીર્ણતયા નિત્યં સ્થાપયેન્મતિમત્તમાઃ ॥ ૪૮॥

અન્નપાનાદિભિર્વસ્ત્રૈઃ સર્વાન્ રાજાઽભિરક્ષયેત્ ।
વૈદિકાંસ્તુ વિશેષેણ જ્ઞાનિનં તુ વિશેષતઃ ॥ ૪૯॥

મહાદેવસમો દેવો યથા નાસ્તિ શ્રુતૌ સ્મૃતૌ ।
તથા વૈદિકતુલ્યસ્તુ નાસ્તિ તન્ત્રાવલમ્બિષુ ॥ ૫૦॥

શિવજ્ઞાનસમં જ્ઞાનં યથા નાસ્તિ શ્રુતૌ સ્મૃતૌ ।
તથા વૈદિકતુલ્યસ્તુ નાસ્તિ તન્ત્રાવલમ્બિષુ ॥ ૫૧॥

યથા વારાણસી તુલ્યા પુરી નાસ્તિ શ્રુતૌ સ્મૃતૌ ।
તથા વૈદિકતુલ્યસ્તુ નાસ્તિ તન્ત્રાવલમ્બિષુ ॥ ૫૨॥

ષડક્ષરોસમો મન્ત્રો યથા નાસ્તિ શ્રુતૌ સ્મૃતૌ ।
તથા વૈદિકતુલ્યસ્તુ નાસ્તિ તન્ત્રાવલમ્બિષુ ॥ ૫૩॥

યથા ભાગીરથીતુલ્યા નદી નાસ્તિ શ્રુતૌ સ્મૃતૌ ।
તથા વૈદિકતુલ્યસ્તુ નાસ્તિ તન્ત્રાવલમ્બિષુ ॥ ૫૪॥

ઓદનેન સમં ભોજ્યં યથા લોકે ન વિદ્યતે ।
તથા વૈદિકતુલ્યસ્તુ નાસ્તિ તન્ત્રાવલમ્બિષુ ॥ ૫૫॥

દેવદેવો મહાદેવો યથા સર્વૈઃ પ્રપૂજ્યતે ।
તથૈવ વૈદિકો મર્ત્યઃ પૂજ્યઃ સર્વજનૈરપિ ॥ ૫૬॥

આદિત્યેન વિહીનં તુ જગદન્ધં યથા ભવેત્ ।
તથા વૈદિકહીનં તુ જગદન્ધં ન સંશયઃ ॥ ૫૭॥

પ્રાણેન્દ્રિયાદિહીનં તુ શરીરં કુણપં યથા ।
તથા વૈદિકહીનં તુ જગદ્વ્યર્થં ન સંશયઃ ॥ ૫૮॥

અહો વૈદિકમાહાત્મ્યં મયા વક્તું ન શક્યતે ।
વેદ એવ તુ માહાત્મ્યં વૈદિકસ્યાબ્રવીન્મુદા ॥ ૫૯॥

સ્મૃતયશ્ચ પુરાણાનિ ભારતાદીનિ સુવ્રતાઃ ।
વૈદિકસ્ય તુ માહાત્મ્યં પ્રવદન્તિ સદા મુદા ॥ ૬૦॥

વેદોક્તં તાન્ત્રિકાઃ સર્વે સ્વીકુર્વન્તિ દ્વિજર્ષભાઃ ।
નોપજીવન્તિ તન્ત્રોક્તં વેદ સાક્ષાત્સનાતનઃ ॥ ૬૧॥

ઇત્યુક્ત્વા ભગવાન્સૂતઃ સ્વગુરું વ્યાસસંજ્ઞિતમ્ ।
સ્મૃત્વા ભક્ત્યા વશો ભૂત્વા પપાત ભુવિ દણ્ડવત્ ॥ ૬૨॥

અસ્મિન્નવસરે શ્રીમાન્મુનિઃ સત્યવતીસુતઃ ।
શિષ્યસ્મૃત્યઙ્કુશાકૃષ્ટસ્તત્રૈવાઽઽવિરભૂત્સ્વયમ્ ॥ ૬૩॥

તં દૃષ્ટ્વા મુનયઃ સર્વે સન્તોષાદ્ગદ્ગદસ્વરાઃ ।
નિશ્ચેષ્ટા નિતરાં ભૂમૌ પ્રણમ્ય કરુણાનિધિમ્ ॥ ૬૪॥

સ્તોત્રૈઃ સ્તુત્વા મહાત્માનં વ્યાસં સત્યવતીસુતમ્ ।
પૂજયામાસુરત્યર્થં વન્યપુષ્પફલાદિભિઃ ॥ ૬૫॥

ભગવાનપિ સર્વજ્ઞઃ કરુણાસાગરઃ પ્રભુઃ ।
ઉવાચ મધુરં વાક્યં મુનીનાલોક્ય સુવ્રતાન્ ॥ ૬૬॥

વ્યાસ ઉવાચ -
શિવમસ્તુ મુનીન્દ્રાણાં નાશિવં તુ કદાચન ।
અહો ભાગ્યમહો ભાગ્યં મયા વક્તું ન શક્યતે ॥ ૬૭॥

શ્રૂયતાં મુનયઃ સર્વે ભાગ્યવન્તઃ સમાહિતાઃ ।
પ્રસાદાદેવ રુદ્રસ્ય પ્રભોઃ કારુણિકસ્ય ચ ॥ ૬૮॥

પુરાણાનાં સમસ્તાનામહં કર્તા પુરાઽભવમ્ ।
મત્પ્રસાદાદયં સૂતસ્ત્વભવદ્રુદ્રવલ્લભઃ ॥ ૬૯॥

રુદ્રસ્યાઽઽજ્ઞાબલાદેવ પ્રભોઃ કારુણિકસ્ય ચ ।
પુરાણસંહિતકર્તા દેશિકશ્ચાભવદ્ભૃશમ્ ॥ ૭૦॥

પુરા કૃતેન પુણ્યેન ભવન્તોઽપીશ્વરાજ્ઞયા ।
સૂતાદસ્માચ્છ્રુતેરર્થં શ્રુતવન્તો યથાતથમ્ ॥ ૭૧॥

કૃતાર્થાશ્ચ પ્રસાદશ્ચ રૌદ્રઃ કિં ન કરિષ્યતિ ।

આજ્ઞયા કેવલં શમ્ભોરહં વેદાર્થવેદને ॥ ૭૨॥

સમ્પૂર્ણઃ સર્વવેદાન્તવાક્યાનામર્થનિશ્ચયે ।
સમર્થશ્ચ નિયુક્તશ્ચ સૂત્રારમ્ભકૃતેઽપિ ચ ॥ ૭૩॥

આજ્ઞયા દેવદેવસ્ય ભવતામપિ યોગિનામ્ ।
જ્ઞાને ગુરુગુરુશ્ચાહમભવં મુનિપુઙ્ગવાઃ ॥ ૭૪॥

ભવન્તોઽપિ શિવજ્ઞાને વેદસિદ્ધે વિશેષતઃ ।
ભક્ત્યા પરમયા યુક્તા નિષ્ઠા ભવત સર્વદા ॥ ૭૫॥

ઇત્યુક્ત્વા ભગવાન્ વ્યાસઃ સ્વશિષ્યં સૂતમુત્તમમ્ ।
ઉત્થાપ્યાઽઽલિઙ્ગ્ય દેવેશં સ્મૃત્વા નત્વાઽગમદ્ગુરુઃ ॥ ૭૬॥

પુનશ્ચ સૂતઃ સર્વજ્ઞઃ સ્વશિષ્યાનવલોક્ય ચ ।
પ્રાહ ગમ્ભીરયા વાચા ભવતાં શિવમસ્ત્વિતિ ॥ ૭૭॥

મયોક્તા પરમા ગીતા પઠિતા યેન તસ્ય તુ ।
આયુરારોગ્યમૈશ્વર્યં વિજ્ઞાનં ચ ભવિષ્યતિ ॥ ૭૮॥

શિવપ્રસાદઃ સુલભો ભવિષ્યતિ ન સંશયઃ ।
ગુરુત્વં ચ મનુષ્યાણાં ભવિષ્યતિ ન સંશયઃ ॥ ૭૯॥

વિદ્યારૂપા યા શિવા વેદવેદ્યા
સત્યાનન્દાનન્તસંવિત્સ્વરૂપા ।
તસ્યા વાચઃ સર્વલોકૈક માતુ-
ર્ભક્ત્યા નિત્યં ચમ્બિકાયાઃ પ્રસાદાત્ ॥ ૮૦॥

ગુરુપ્રસાદાદપિ સુવ્રતા મયા
શિવપ્રસાદાદપિ ચોત્તમોત્તમાત્ ।
વિનાયકસ્યાપિ મહાપ્રસાદાત્
ષડાનનસ્યાપિ મહાપ્રસાદાત્ ॥ ૮૧॥

યજ્ઞવૈભવસમાહ્વયઃ કૃતઃ
સર્વવેદમથનેન સત્તમાઃ ।
અત્ર મુક્તિરપિ શોભના પરા
સુસ્થિતૈવ ન હિ તત્ર સંશયઃ ॥ ૮૨॥

યજ્ઞવૈભવસમાહ્વયં પરં

ખણ્ડમત્ર વિમલં પઠેન્નરઃ ।
સત્યબોધસુખલક્ષણં
સત્યમેવ ઝટિતિ પ્રયાતિ હિ ॥ ૮૩॥

મદુક્તસંહિતા પરા સમસ્તદુઃખહારિણી
નરસ્ય મુક્તિદાયિની શિવપ્રસાદકારિણી ।
સમસ્તવેદસારતઃ સુનિર્મિતાઽતિશોભના
મહત્તરાનુભૂતિમદ્ભિરાદૃતા ન ચાપરૈઃ ॥ ૮૪॥

મદુક્તસંહિતા તુ યા તયા વિરુદ્ધમસ્તિ ચે-
દનર્થકં હિ તદ્બુધા વચઃ પ્રયોજનાય ન ।
શ્રુતિપ્રમાણરૂપિણી સુસંહિતા મયોદિતા
શ્રુતિપ્રમાણમેવ સા મહાજનસ્ય સન્તતમ્ ॥ ૮૫॥

મદુક્તસંહિતામિમામતિપ્રિયેણ માનવઃ
પઠન્ન યાતિ સંસૃતિં પ્રયાતિ શઙ્કરં પરમ્ ।
અતશ્ચ શોભનામિમામહર્નિશં સમાહિતઃ
શ્રુતિપ્રમાણવત્પઠેદતન્દ્રિતઃ સ્વમુક્તયે ॥ ૮૬॥

પુરાણસંહિતામિમામતિપ્રિયેણ યઃ પુમાન્
શ્રુણોતિ સંસૃતિં પુનર્ન યાતિ યાતિ શઙ્કરમ્ ।
પરાનુભૂતિરદ્વયા વિજાયતે ચ તસ્ય સા
શિવા ચ વાચિ નૃત્યતિ પ્રિયેણ શઙ્કરોઽપિ ચ ॥ ૮૭॥

સત્યપૂર્ણસુખબોધલક્ષણં
તત્ત્વમર્થવિભવં સનાતનમ્ ।
સત્સ્વરૂપમશુભાપહં શિવં
ભક્તિગમ્યમમલં સદા નુમઃ ॥ ૮૮॥

યાઽનુભૂતિરમલા સદોદિતા
વેદમાનનિરતા શુભાવહા ।
તામતીવ સુખદામહં શિવાં
કેશવાદિજનસેવિતાં નુમઃ ॥ ૮૯॥

વેદપદ્મનિકરસ્ય ભાસ્કરં
દેવદેવસદૃશં ઘૃણાનિધિમ્ ।
વ્યાસમિષ્ટફલદં ગુરું નુમઃ

શોકમોહવિષરોગભેષજમ્ ॥ ૯૦॥

યે વેદવેદાન્તધના મહાજનાઃ
શિવાભિમાનૈકનિરસ્તકિલ્બિષાઃ ।
નમામિ વાચા શિરસા હૃદા ચ તાન્
ભવાહિવેગસ્ય નિવારકાનહમ્ ॥ ૯૧॥

॥ ઇતિ શ્રીસ્કાન્દપુરાણે સૂતસંહિતાયાં ચતુર્થસ્ય
યજ્ઞવૈભવખણ્ડસ્યોપરિભાગે સૂતગીતાયાં
સર્વવેદાન્તસઙ્ગ્રહો નામાષ્ટમોઽધ્યાયઃ ॥ ૮॥

સૂતગીતા સમાપ્તા ।

ૐ તત્સત્

Encoded and proofread by Sunder Hattangadi

*sUtagItA*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*